# अध्याय २ वल्ली १

एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते।

दृश्यते त्वग्र्यया बुद्ध्या (१.३.१२) इत्युक्तम्।

कः पुनः प्रतिबन्धोऽग्र्यायाः बुद्धेः, येन तदभावाद् आत्मा न दृश्यते इति तददर्शन-कारण-प्रदर्शनार्था

वल्ल्यारभ्यते।

विज्ञाते हि श्रेयःप्रतिबन्ध-कारणे तदपनयनाय यत्नः आरब्धुं शक्यते नान्यथेति -

**पराञ्चि खानि व्यतृणत् स्वयम्भूः। तस्मात् पराङ्पश्यति नान्तरात्मन्।**

**कश्चिद्धीरः प्रत्यगात्मानमैक्षद् आवृत्तचक्षुरमृतत्वमिच्छन्।। २.१.१ ।।**

स्वयम्भूः खानि पराञ्चि व्यतृणत्। तस्मात् (तानि) पराङ्पश्यति। अन्तरात्मन् (अन्तरात्मानम्) न (पश्यति)। कश्चित् धीरः अमृतत्वम् इच्छन् आवृत्तचक्षुः (सन्) प्रत्यगात्मानम् ऐक्षत् ।

पराञ्चि परागञ्चन्ति गच्छन्तीति।

खानि तदुपलक्षितानि श्रोत्रादीनीन्द्रियाणि खानि इत्युच्यन्ते।

तानि पराञ्च्येव शब्दादि-विषय-प्रकाशनाय प्रवर्त्तन्ते।

यस्माद् एवं-स्वभावकानि तानि व्यतृणत् हिंसितवान् हननं कृतवानित्यर्थः।

कोऽसौ स्वयंभूः परमेश्वरः स्वयमेव स्वतन्त्रो भवति सर्वदा, न पर-तन्त्र इति।

तस्मात् पराङ् पराग्रूपान् अनात्म-भूतान् शब्दादीन् पश्यति उपलभते उपलब्धा नान्तरात्मन् न

अन्तरात्मानम् इत्यर्थः।

एवं-स्वभावेऽपि सति लोकस्य, कश्चित् नद्याः प्रतिस्रोतः-प्रवर्त्तनम् इव धीरः धीमान् विवेकी प्रत्यगात्मानं

प्रत्यक् चासावात्मा चेति प्रत्यगात्मा।

प्रतीच्येवात्म-शब्दो रूढो लोके, नान्यस्मिन्।

व्युत्पत्ति-पक्षेऽपि तत्रैवात्म-शब्दो वर्त्तते।

यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह।

यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते।। (लिङ्ग.पु. ७०-९६)

इत्यात्म-शब्द-व्युत्पत्ति-स्मरणात्।

तं प्रत्यगात्मानं स्वं स्वभावम् ऐक्षत् अपश्यत् पश्यतीत्यर्थः, छन्दसि कालानियमात्।

कथं पश्यति इत्युच्यते - आवृत्तचक्षुः आवृत्तं व्यावृत्तं चक्षुः श्रोत्रादिकम् इन्द्रिय-जातम् अशेष-विषयाद्

यस्य स आवृत्त-चक्षुः।

स एवं संस्कृतः प्रत्यगात्मानं पश्यति।

न हि बाह्य-विषयालोचन-परत्वं प्रत्यगात्मेक्षणं चैकस्य सम्भवति।

किमर्थं पुनरित्थं महता प्रयासेन स्वभाव-प्रवृत्ति-निरोधं कृत्वा धीरः प्रत्यगात्मानं पश्यति इत्युच्यते -

अमृतत्वम् अमरण-धर्मत्वं नित्य-स्वभावताम् इच्छन् अत्मन इत्यर्थः।। १ ।।

**आनन्दगिरिटीका**

अनादिरविद्याप्रतिबन्धः प्रागुक्तः। अधुना आगन्तुक-प्रतिबन्ध-दर्शनाय उत्तरवल्ल्यारम्भ इति सम्बन्धमाह - **एष सर्वेषु** इत्यादिना। यदि इन्द्रियाण्यन्तर्मुखानि स्युः तदा तानि आत्मनिष्ठतया अमृतत्वमीयुः अत इन्द्रियाणि बहिर्मुखानि सृष्टानि इति यत् तत्तेषां हननमेव कृतमित्यर्थः। आप्लृ व्याप्तौ इति धात्वर्थानुसारेण व्यापक आत्मशब्दार्थः। यद्यस्मादादत्ते संहरति स्वात्मन्येव सर्वमिति जगदुपादानं लभ्यते विषयानत्ति इत्यात्मेति व्युत्पत्त्या स्वचैतन्याभासेन उपलब्धृत्वमात्मशब्दार्थः। येन कारणेन अस्यात्मनः सन्ततो निरन्तरो भावः कल्पितस्य अधिष्ठान-सत्तामन्तरेण सत्ताभावाद् यथा रज्ज्वामध्यस्ते सर्पे रज्ज्वाः सातत्यं तथा कल्पितं सर्वं येन स्वस्वरूपवत् स आत्मा इत्यर्थः। (१)

यत्तावत् स्वाभाविकं परागेवानात्म-दर्शनं तदात्म-दर्शनस्य प्रतिबन्ध-कारणम् अविद्या तत्प्रतिकूलत्वात्, या

च परागेवाविद्योपप्रदर्शितेषु दृष्टादृष्टेषु भोगेषु तृष्णा, ताभ्याम् अविद्या-तृष्णाभ्यां प्रतिबद्धात्म-दर्शनाः -

**पराचः कामाननुयन्ति बालाः। ते मृत्योर्यन्ति विततस्य पाशम्।**

**अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते।। २.१.२ ।।**

(ये) बालाः पराचः कामान् अनुयन्ति ते विततस्य (विस्तीर्णस्य) मृत्योः पाशम् यन्ति। अथ इह धीराः ध्रुवम् अमृतत्वं विदित्वा अध्रुवेषु न प्रार्थयन्ते।

पराचः बहिर्गतानेव कामान् काम्यान् विषयान् अनुयन्ति अनुगच्छन्ति बालाः अल्प-प्रज्ञाः।

ते तेन कारणेन मृत्योः अविद्या-काम-कर्म-समुदायस्य यन्ति गच्छन्ति विततस्य विस्तीर्णस्य सर्वतो

व्याप्तस्य पाशं पाश्यते बध्यते येन तं पाशं देहेन्द्रियादि-संयोग-वियोग-लक्षणम्।

अनवरतं जन्म-मरण-जरा-रोगाद्यनेकानर्थ-व्रातं प्रतिपद्यन्त इत्यर्थः।

यत एवम् अथ तस्मात् धीराः विवेकिनः प्रत्यगात्म-स्वरूपावस्थान-लक्षणम् अमृतत्वं ध्रुवं विदित्वा।

देवाद्यमृतत्वं हि अध्रुवम्।

इदं तु प्रत्यगात्म-स्वरूपावस्थान-लक्षणं न कर्मणा वर्धते नो कनीयान् (बृ. ४.४.२३) इति ध्रुवम्।

तदेवं-भूतं कूटस्थमविचाल्यममृतत्वं विदित्वा अध्रुवेषु सर्व-पदार्थेषु अनित्येषु निर्धार्य, ब्राह्मणाः इह संसारेऽनर्थ-प्राये न प्रार्थयन्ते किञ्चिदपि, प्रत्यगात्म-दर्शन-प्रतिकूलत्वात्।

पुत्र-वित्त-लोकैषणाभ्यो व्युत्तिष्ठन्त्येवेत्यभिप्रायः।। २ ।।

यद्विज्ञानान्न किञ्चिदन्यत्प्रार्थयन्ते ब्राह्मणाः, कथं तदधिगमः इत्युच्यते -

**येन रूपं रसं गन्धं शब्दान् स्पर्शाँश्च मैथुनान्।**

**एतेनैव विजानाति किमत्र परिशिष्यते। एतद्वै तत्।। २.१.३ ।।**

येन एतेनैव रूपं रसं गन्धं शब्दान् स्पर्शान् मैथुनान् च विजानाति अत्र किं परिशिष्यते (यत् चैतन्येन न प्रकाश्यते)। एतद्वै तत्।

येन विज्ञान-स्वभावेनात्मना

रूपं रसं गन्धं शब्दान् स्पर्शांश्च मैथुनान् मैथुन-निमित्तान्सुख-प्रत्ययान् विजानाति विस्पष्टं जानाति सर्वो लोकः।

आक्षेपः ननु नैवं प्रसिद्धिर्लोकस्य आत्मना देहादि-विलक्षणेनाहं विजानामि इति।

देहादि-सङ्घातोऽहं विजानामि इति तु सर्वो लोकोऽवगच्छति।

समाधानम् न त्वेवम्।देहादि-सङ्घातस्यापि शब्दादि-स्वरूपत्वाविशेषाद् विज्ञेयत्वाविशेषाच्च न युक्तं विज्ञातृत्वम्।

यदि हि देहादि-सङ्घातो रूपाद्यात्मकः सन् रूपादीन् विजानीयात्, तर्हि बाह्या अपि रूपादयोऽन्योन्यं स्वं स्वं

रूपं च विजानीयुः।

न चैतदस्ति।

तस्माद् देहादि-लक्षणांश्च रूपादीन् एतेनैव देहादि-व्यतिरिक्तेनैव विज्ञान-स्वभावेनात्मना विजानाति लोकः।

यथा येन लोहो दहति सोऽग्निरिति तद्वत्।

आत्मनोऽविज्ञेयम् किम् अत्र अस्मिँल्लोके परिशिष्यते न किञ्चित् परिशिष्यते।

सर्वमेव त्वात्मना विज्ञेयम्।

यस्यात्मनोऽविज्ञेयं न किञ्चित् परिशिष्यते, स आत्मा सर्वज्ञः।

एतद्वै तत्। किं तत् यन्नचिकेतसा पृष्टं, देवादिभिः अपि विचिकित्सितं, धर्मादिभ्योऽन्यत्, विष्णोः परमं

पदं, यस्मात्परं नास्ति, तद्वै एतदधिगतमित्यर्थः।। ३ ।।

**आनन्दगिरिटीका**

कथं तदधिगम इति किं वैदिकत्वाद् धर्मवत् परोक्षत्वेन किं वा घटादिवत् सिद्धत्वाद् अपरोक्षत्वेनापिइत्याकांक्षायाम् आत्मत्वाद् ब्रह्मणोऽपरोक्षत्वेन एवावगमः सम्यगवगम इत्युच्यते - **येन** इत्यादिना। मूढानां व्यतिरिक्तेन आत्मना देहादेः वेद्यत्वं यद्यपि न प्रसिद्धं तथापि विचारकाणां व्यतिरिक्तेनैव वेद्यत्वं प्रसिद्धम्। ततो यच्छब्देन प्रसिद्धवत् परामर्शो न विरुध्यते इति परिहरति - **न त्वेवं देहादि** इत्यादिना। (गुणगुणिनोः अभेदाद् देहादिसंघाताः शब्दादिरूपाः)। दैदिकाः (देहसंबन्धिनः) शब्दादयः न स्वात्मानम् अन्यं च विजानीयुः शब्दादित्वाद् दृश्यत्वात् च बाह्यवत् (बाह्यशब्दादिवत्)। विपक्षे बाधकमाह - **यदि हि** इति।

अतिसूक्ष्मत्वाद्दुर्विज्ञेयमिति मत्वैतमेवार्थं पुनः पुनराह -

**स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति।**

**महान्तं विभुमात्मानं मत्वा धीरो न शोचति।। २.१.४ ।।**

स्वप्नान्तं (स्वप्नमध्यं स्वप्नपदार्थान्) जागरितान्तं च उभौ (सुषुप्त्यन्तं च, पदार्थानामभावं च) येन अनुपश्यति (तं) महान्तं विभुमात्मानं मत्वा धीरो न शोचति।

स्वप्नान्तं स्वप्न-मध्यं, स्वप्न-विज्ञेयमित्येतत्।

तथा जागरितान्तं जागरित-मध्यं जागरित-विज्ञेयं च।

उभौ स्वप्न-जागरितान्तौ येन आत्मना अनुपश्यति लोकः इति सर्वं पूर्ववत्।

तं महान्तं विभुमात्मानं मत्वा अवगम्य आत्म-भावेन साक्षादहमस्मि परमात्मा इति धीरः न शोचति।। ४

।।

किञ्च -

**य इमं मध्वदं वेद आत्मानं जीवमन्तिकात्।**

**ईशानं भूतभव्यस्य न ततो विजुगुप्सते। एतद्वै तत्।। २.१.५ ।।**

य इमं मध्वदं जीवम् आत्मानं भूतभव्यस्य ईशानम् अन्तिकात् (अभिन्नत्वेन) वेद (सः) ततो न विजुगुप्सते। एतद्वै तत्।।
मधु कर्मफलम् अत्ति इति मध्वदः तम्।

यः कश्चिद् इमं मध्वदं कर्म-फल-भुजं जीवं प्राणादि-कलापस्य धारयितारम् आत्मानं वेद विजानाति अन्तिकात् अन्तिके समीपे ईशानम् ईशितारं भूतभव्यस्य काल-त्रयस्य, ततः तद्विज्ञानादूर्ध्वम् आत्मानं न विजुगुप्सते न गोपायितुमिच्छति, अभय-प्राप्तत्वात्।

यावद्धि भय-मध्यस्थोऽनित्यमात्मानं मन्यते तावद् गोपायितुम् इच्छति आत्मानम्।

यदा तु नित्यमद्वैतमात्मानं विजानाति, तदा कः किं कुतो वा गोपायितुम् इच्छेत्।

एतद्वै तत् इति पूर्ववत्।। ५ ।।

यः प्रत्यगात्मेश्वर-भावेन निर्दिष्टः, स सर्वात्मेत्येतद्दर्शयति -

**यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत।**

**गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यत। एतद्वै तत्।। २.१.६ ।।**

यः (मुमुक्षुः) पूर्वं तपसो जातम् अद्भ्यः (ब्रह्माण्डारम्भक-स्थूलभूतेभ्यः) पूर्वं यः अजायत (तम्) गुहां प्रविश्य तिष्ठन्तं भूतेभिः व्यपश्यत अथवा यः हिरण्यगर्भः तपसः जातः, अद्भ्यः पूर्वम् अजायत, तं यः मुमुक्षुः व्यपश्यत(सः ब्रह्म एव पश्यति। कार्यकारणयोः अभेदात्)। तत् (नचिकेतसा पृष्टं तत्वम्) एतत् (एतन्मन्त्रोक्तस्वरूपमेव) वै।।

यः कश्चिन्मुमुक्षुः पूर्वं प्रथमं तपसः ज्ञानादि-लक्षणाद् ब्रह्मण इत्येतत्।

जातम् उत्पन्नं हिरण्यगर्भम्।

किमपेक्ष्य पूर्वम् इत्याह - अद्भ्यः पूर्वम् अप्सहितेभ्यः पञ्च-भूतेभ्यः, न केवलाभ्योऽद्भ्य इत्यभिप्रायः।

अजायत उत्पन्नः यस्तं प्रथमजं देवादि-शरीराणि उत्पाद्य सर्व-प्राणि-गुहां हृदयाकाशं प्रविश्य तिष्ठन्तं

शब्दादीनुपलभमानं भूतेभिः भूतैः कार्य-करण-लक्षणैः सह तिष्ठन्तं यः व्यपश्यत यः पश्यतीत्येतत्।

य एवं पश्यति, स एतद् एव पश्यति यत् तत् प्रकृतं ब्रह्म।। ६ ।।

**आनन्दगिरिटीका**

यः कश्चित् पूर्वं तपसो जातं पश्यति स प्रकृतं ब्रह्मैव पश्यति इत्यन्वयः। अद्भ्यः पूर्वमित्यादिना हिरण्यगर्भस्य विशेषेण अन्तःकरणांशेन जीवावच्छेदकत्वाद् जीवतादात्म्यविवक्षया विशेषणं शब्दादीन् उपलभमानमिति। **यदिति**। यस्माल्लोके सुवर्णाज्जातं कुण्डलं सुवर्णमेव भवति तद्वद् ब्रह्मणो जातो हिरण्यगर्भोऽपि ब्रह्मात्मक एवेत्यर्थः। (६)

किञ्च -

**या प्राणेन सम्भवत्यदितिर्देवतामयी।**

**गुहां प्रविश्य तिष्ठन्तीं या भूतेभिर्व्यजायत। एतद्वै तत्।। २.१.७ ।।**

या देवतामयी (या) प्राणेन सम्भवति (या) भूतेभिर्व्यजायत (सा) अदितिः। यः (मुमुक्षुः) गुहां प्रविश्य तिष्ठन्तीं ताम् (अदितिं) (वेद सः ब्रह्म एव वेद)। तत् (नचिकेतसा पृष्टं तत्वम्) एतत् (एतन्मन्त्रोक्तस्वरूपमेव) वै।।

या सर्व-देवतामयी सर्व-देवतात्मिका प्राणेन हिरण्यगर्भ-रूपेण परस्माद् ब्रह्मणः सम्भवति शब्दादीनामदनात्

अदितिः तां पूर्ववद् गुहां प्रविश्य तिष्ठन्तीम् अदितिम्।

तामेव विशिनष्टि - या भूतेभिः भूतैः समन्विता व्यजायत उत्पन्नेत्येतत्।। ७ ।।

**आनन्दगिरिटीका**

हिरण्यगर्भस्यैव विशेषणान्तरमाह - **किंच** इति। (७)

किञ्च -

**अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः।**

**दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः। एतद्वै तत्।। २.१.८ ।।**

गर्भिणीभिः गर्भः सुभृतः इव अरण्योर्निहितः जातवेदाः मनुष्येभिः जागृवद्भिः हविष्मद्भिः दिवे दिव ईड्यः। एतद् अग्निः (विराट्) वै तत् (ब्रह्म)।
जातवेदाः जातं जातं वेत्ति इति। सुभृतः सुष्ठु भृतः।

यः अधियज्ञः उत्तराधर-अरण्योः निहितः स्थितः जातवेदाः अग्निः पुनः सर्व-हविषां भोक्ता अध्यात्मं च

योगिभिः गर्भः इव गर्भिणीभिः अन्तर्वत्नीभिरगर्हितान्न-पान-भोजनादिना यथा गर्भः सुभृतः सुष्ठु सम्यग्भृतो

लोके (इव) इति, इत्थमेव ऋत्विग्भिः योगिभिश्च सुभृत इत्येतत्।

किञ्च, दिवे दिवे अहन्यहनि ईड्यः स्तुत्यो वन्द्यश्च कर्मिभिः योगिभिश्चाध्वरे हृदये च जागृवद्भिः जागरण-

शीलवद्भिः अप्रमत्तैरित्येतत्।

हविष्मद्भिः आज्यादिमद्भिः ध्यान-भावनावद्भिश्च मनुष्येभिः मनुष्यैः अग्निः।

एतद्वै तत् तदेव प्रकृतं ब्रह्म।। ८ ।।

किञ्च -

**यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति।**

**तं देवाः सर्वे अर्पितास्तदु नात्येति कश्चन। एतद्वै तत्।। २.१.९ ।।**

सूर्यः यतः च उदेति यत्र च अस्तं गच्छति सर्वे देवाः तम् अर्पिताः। तद् कश्चन न उ अत्येति। एतद्वै तत्।

यतश्च यस्मात्प्राणाद् उदेति उत्तिष्ठति सूर्यः, अस्तं निम्लोचनं यत्र यस्मिन्नेव च प्राणे अहन्यहनि गच्छति, तं प्राणमात्मानं देवाः सर्वे अग्न्यादयः अधिदैवं, वागादयश्चाध्यात्मं, सर्वे विश्वे अरा इव रथ-नाभौ अर्पिताः सम्प्रवेशिताः स्थिति-काले।

सोऽपि ब्रह्मैव।

तद् एतत्सर्वात्मकं ब्रह्म, तद् उ नात्येति नातीत्य तदात्मकतां तदन्यत्वं गच्छति, कश्चन कश्चिदपि।

एतद्वै तत्।। ९ ।।

यद् ब्रह्मादि-स्थावरान्तेषु वर्त्तमानं तत्तदुपाधिकत्वाद् अब्रह्मवद् अवभासमानं संसारी अन्यत् परस्माद्

ब्रह्मणः, इति मा भूत्कस्यचिदाशङ्का इतीदमाह ऋ

**यदेवेह तदमुत्र यदमुत्र तदन्विह।**

**मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।। २.१.१० ।।**

इह (जीवोपाधौ) यद् (चिदात्मा सर्वबुद्धिसाक्षितया वर्त्तते) तत् (एव) अमुत्र (ईश्वरोपाधौ अपि वर्त्तते)। यद् अमुत्र तत् (एव) इह (जीवोपाधौ) अनु (प्रविष्टम्)। य इह (अस्मिन् ब्रह्मणि) नानेव पश्यति सः मृत्योः मृत्युमाप्नोति।

यदेवेह कार्य-कारणोपाधि-समन्वितं संसार-धर्मवद् अवभासमानमविवेकिनाम्, तद् एव स्वात्मस्थम् अमुत्र

नित्य-विज्ञान-घन-स्वभावं सर्व-संसार-धर्म-वर्जितं ब्रह्म।

यत् च अमुत्र अमुष्मिन् आत्मनि स्थितम्, तदनु इह तदेव इह नाम-रूप-कार्य-करणोपाधिम् अनु

विभाव्यमानं, नान्यत्।

तत्रैवं सति उपाधि-स्वभाव-भेद-दृष्टि-लक्षणया अविद्यया मोहितः सन् य इह ब्रह्मणि अनानाभूते परस्मादन्योऽहं मत्तोऽन्यत्परं ब्रह्मइति नाना इव भिन्नम् इव पश्यति उपलभते, सः मृत्योः मरणाद् मरणं मृत्युं पुनः पुनः जन्म-मरण-भावम् आप्नोति प्रतिपद्यते।

तस्मात्तथा न पश्येत्।

विज्ञानैक-रसं नैरन्तर्येणाकाशवत् परिपूर्णं ब्रह्मैवाहमस्मि इति पश्येदिति वाक्यार्थः।। १० ।।

**आनन्दगिरिटीका**

सर्वात्मकं ब्रह्म उक्तं तदसत्। उपाध्यवच्छिन्नचैतन्यस्य जीवस्य संसारित्वाद् विरुद्धधर्माक्रान्तयोः ऐक्यायोगाद् इत्याशङ्क्य विरुद्धधर्मत्वस्य उपाधिनिबन्धनत्वात् स्वभावैक्ये न किञ्चिद् अनुपपन्नमित्याह - **यद् ब्रह्मादि** इत्यादिना। **अमुष्मिन्** जगत्कारणत्वोपाधौ। (अन्तःकरणादि) उपाधि-स्वभावश्च, भेद-दृष्टिश्च ताभ्यां कारणतया लक्ष्यते इति उपाधि-स्वभाव-भेद-दृष्टि-लक्षण। न हि अन्तःकरणाद्युपाधेः भेददृष्टेश्च अनिर्वाच्याविद्यामन्तरेण सम्भवः। कार्यकारणभावस्य संवित्सम्बन्धस्य च दुर्निरूपत्वात्। नानेव इत्युपमार्थः इवशब्दः। यथा स्वप्ने नानात्वाभावेऽपि नानात्वमध्यारोप्य सत्यत्वाभिनिवेशेन व्यवहरति तथा जागरितेऽपि नानात्वमध्यारोप्य सत्यत्वाभिनिवेशेन यो व्यवहरति तस्य निन्दितत्वाद् एकरसं ब्रह्मैव अस्मि इति प्रतिपत्तव्यमित्यर्थः। (१०)

**मनसैवेदमाप्तव्यम्। नेह नानास्ति किञ्चन।**

**मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति।। २.१.११ ।।**

इह किञ्चन नाना नास्ति। इदं (ज्ञानम्) मनसा (शास्त्राचार्यसंस्कृतमनसा) एव आप्तव्यम्। य इह नानेव पश्यति सः मृत्योः मृत्युं गच्छति ।। २.१.११ ।।

प्रागेकत्व-विज्ञानादाचार्यागम-संस्कृतेन मनसैव इदं ब्रह्म एक-रसम् आप्तव्यम् आत्मैव नान्यदस्ति अति।

आप्ते च नानात्व-प्रत्युपस्थापिकाया अविद्याया निवृत्तत्वाद् इह ब्रह्मणि नाना न अस्ति किञ्चन अणु-

मात्रमपि।

यः तु पुनरविद्या-तिमिर-दृष्टिं न मुञ्चति इह ब्रह्मणि नाना इव पश्यति, स मृत्योर्मृत्युं गच्छति एव स्वल्पमपि

भेदमध्यारोपयन् इत्यर्थः।। ११ ।।

**आनन्दगिरिटीका**

एकरसं चेद् ब्रह्म कथं ज्ञातृज्ञेयविभागः इत्याशङ्क्य अज्ञं प्रति कल्पितभेदेन इत्याह - **प्रागेकत्वविज्ञानात्** इति।

पुनरपि तदेव प्रकृतं ब्रह्माह -

**अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति।**

**ईशानो भूतभव्यस्य न ततो विजुगुप्सते। एतद्वै तत्।। २.१.१२ ।।**

अङ्गुष्ठमात्रः पुरुषः भूतभव्यस्य ईशानः मध्ये आत्मनि तिष्ठति। (तं ज्ञात्वा) ततो न विजुगुप्सते। एतद्वै तत्।

अङ्गुष्ठमात्रः अङ्गुष्ठ-परिमाणः।

अङ्गुष्ठ-परिमाणं हृदय-पुण्डरीकं तच्छिद्रवर्त्यन्तः-करणोपाधिः अङ्गुष्ठ-मात्रः, अङ्गुष्ठ-मात्र-वंश-पर्व-मध्यवर्त्यम्बरवत्।

पुरुषः पूर्णमनेन सर्वमिति।

मध्ये आत्मनि शरीरे तिष्ठति यः तमात्मानम् ईशानं भूतभव्यस्य विदित्वा, न ततः इत्यादि पूर्ववत्।। १२ ।।

**आनन्दगिरिटीका**

अङ्गुष्ठपरिमाणं जीवमनूद्य ब्रह्मभावविधानाद् विधीयमानविरोधाद् अङ्गुष्ठमात्रस्य अविवक्षितत्वाद् ब्रह्मपरमेव वाक्यमित्याह - **पुनरपि तदेव** इति। (१२)

किञ्च -

**अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः।**

**ईशानो भूतभव्यस्य स एवाद्य स उ श्वः। एतद्वै तत्।। २.१.१३ ।।**

अङ्गुष्ठमात्रः पुरुषः अधूमकः (अधूमकम् - छान्दसम्)) ज्योतिः इव भूतभव्यस्य ईशानः। स एव अद्य (वर्त्तते)। उ सः (एव) श्वः वर्तिष्यते)। एतद्वै तत्।

अङ्गुष्ठमात्रः पुरुषः ज्योतिः इव अधूमकः, अधूमकमिति युक्तं ज्योतिः-परत्वात्।

यस्त्वेवं लक्षितो योगिभिर्हृदये, ईशानः भूतभव्यस्य सः एव नित्यः कूटस्थः अद्य इदानीं प्राणिषु वर्त्तमानः

स उ श्वः अपि वर्तिष्यते।

न अन्यस्तत्समोऽन्यश्च जनिष्यते इत्यर्थः।

अनेन नायमस्तीति चैके इत्ययं पक्षो न्यायतोऽप्राप्तोऽपि स्व-वचनेन श्रुत्या प्रत्युक्तः।

तथा क्षण-भङ्ग-वादश्च।। १३ ।।

पुनरपि भेद-दर्शनापवादं ब्रह्मण आह -

**यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति।**

**एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति।। २.१.१४ ।।**

यथा दुर्गे वृष्टम् उदकं पर्वतेषु विधावति। एवं धर्मान् पृथक् पश्यन् तान् एव अनुविधावति।

यथा उदकं दुर्गे दुर्गमे देशे उच्छ्रिते वृष्टं सिक्तं पर्वतेषु पर्ववत्सु निम्न-प्रदेशेषु विधावति विकीर्णं सद्विनश्यति, एवं धर्मान् आत्मनोऽभिन्नान् पृथक् पश्यन् पृथगेव प्रतिशरीरं पश्यन् तानेव शरीर-भेदानुवर्तिनः अनुविधावति शरीर-भेदमेव पृथक् पुनः पुनः प्रतिपद्यत इत्यर्थः।। १४ ।।

यस्य पुनर्विद्यावतो विध्वस्तोपाधि-कृत-भेद-दर्शनस्य विशुद्ध-विज्ञान-घनैक-रसम् अद्वयमात्मानं पश्यतो

(विजानतो मुनेर्मनन-शीलस्य) आत्म-स्वरूपं कथं भवति इत्युच्यते -

**यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति।**

**एवं मुनेर्विजानत आत्मा भवति गौतम।। २.१.१५ ।।**

।। इति द्वितीयोऽध्याये प्रथमा वल्ली।।

हे गौतम यथा शुद्धे आसिक्तं शुद्धम् उदकं तादृगेव भवति एवं मुनेः विजानत आत्मा (एकः तत्पदार्थाभिन्नः) भवति।

यथा उदकं शुद्धे प्रसन्ने शुद्धं प्रसन्नम् आसिक्तं प्रक्षिप्तम् एक-रसमेव नान्यथा, तादृगेव भवति, आत्मा अपि

एवम् एव भवति एकत्वं विजानतो मुनेः मनन-शीलस्य हे गौतम।

तस्मात्कुतार्किक-भेद-दृष्टिं नास्तिक-कुदृष्टिं चोज्झित्वा मातृ-पितृ-सहस्रेभ्यः अपि हितैषिणा

वेदेनोपदिष्टमात्मैकत्व-दर्शनं शान्त-दर्पैरादरणीयमित्यर्थः।। १५ ।।

इति चतुर्थवल्लीभाष्यम्।।

## अध्याय २ वल्ली २

पुनरपि प्रकारान्तरेण ब्रह्म-तत्त्व-निर्धारणार्थोऽयमारम्भः, दुर्विज्ञेयत्वाद् ब्रह्मणः -

**पुरमेकादशद्वारमजस्यावक्रचेतसः।**

**अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते। एतद्वै तत्।। २.२.१ ।।**

एकादशद्वारम् पुरम् अवक्रचेतसः अजस्य (भवति)। (तम्) अनुष्ठाय न शोचति। विमुक्तः (सन्) विमुच्यते (च)। एतद्वै तत्।

एकादश द्वाराणि अस्य। अवक्रम् अकुटिलं चेतः विज्ञानम् अस्य इति अवक्रचेताः। तस्य।

पुरं पुरम् इव पुरम्।

द्वार-द्वारपालाधिष्ठात्राद्यनेक-पुरोपकरण-सम्पत्ति-दर्शनात् शरीरं पुरम्।

पुरं च सोपकरणं स्वात्मना असंहत-स्वतन्त्र-स्वाम्यर्थं दृष्टम्।

तथेदं पुर-सामान्यादनेकोपकरण-संहतं शरीरं स्वात्मना असंहत-राज-स्थानीय-स्वाम्यर्थं भवितुम् अर्हति।

तच्चेदं शरीराख्यं पुरम् एकादशद्वारम् एकादश द्वाराण्यस्य - सप्त शीर्षण्यानि, नाभ्या सहावाञ्चि त्रीणि,

शिरस्येकम्, तैरेकादश-द्वारं पुरम्।

कस्य अजस्य जन्मादि-विक्रिया-रहितस्य आत्मनो राज-स्थानीयस्य पुर-धर्म-विलक्षणस्य।

अवक्र-चेतसः अवक्रम् अकुटिलम् आदित्य-प्रकाशवद् नित्यमेव अवस्थितम् एक-रूपं चेतो

विज्ञानमस्येति अवक्र-चेताः, तस्यावक्र-चेतसः राज-स्थानीयस्य ब्रह्मणः।

यस्येदं पुरं तं परमेश्वरं पुर-स्वामिनम् अनुष्ठाय ध्यात्वा।

ध्यानं हि तस्यानुष्ठानं सम्यग्विज्ञान-पूर्वकम्।

तं सर्वैषणा-विनिर्मुक्तः सन्समं सर्व-भूतस्थं ध्यात्वा न शोचति।

तद्विज्ञानादभय-प्राप्तेः शोकावसराभावात्कुतो भयेक्षा।

इहैवाविद्या-कृत-काम-कर्म-बन्धनैर्विमुक्तो भवति।

विमुक्तश्च सन् विमुच्यते।

पुनः शरीरं न गृह्णातीत्यर्थः।। १ ।।

**आनन्दगिरिटीका**

पौनरुक्त्यं परिहरन् संबन्धमाह - **पुनरपि** इति। भूयोऽपि पथ्यं वक्तव्यमिति न्यायेन उपायान्तरेण ब्रह्म ज्ञाप्यते। तत्रोपायाः एव भिद्यन्ते नोपेयस्य भेदोऽस्ति इति। पुरेणासंहतत्वं स्वामिनः पुरोपचयापचयाभ्याम् उपचयापचयराहित्यम्। तत्सत्ताप्रतीतिमन्तरेण सत्ताप्रतीतिमत्त्वं स्वातन्त्र्यम्। (१)

स तु नैक-शरीर-पुरवर्त्येवात्मा।

किं तर्हि सर्व-पुर-वर्ती।

कथम् -

**हँ॒सः शुचिषद् वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।**

**नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्।। २.२.२ ।।**

हंसः शुचिषत्। वसुः अन्तरिक्षसत्। होता वेदिषत्। अतिथिः दुरोणसत्। नृषत् वरसत् ऋतसत् व्योमसत् अब्जाः गोजाः ऋतजाः अद्रिजाः ऋतं बृहत्। (सर्वमेव सर्वव्यापी एक आत्मा एव)।

हंसः हन्ति गच्छतीति।

शुचिषत् शुचौ दिवि आदित्यात्मना सीदतीति।

वसुः वासयति सर्वानिति।

वाय्वात्मना अन्तरिक्षे सीदतीति अन्तरिक्षसत्।

होता अग्निः, अग्निर्वै होता (चित्त्युपनिषत् ३.१) इति श्रुतेः।

वेद्यां पृथिव्यां सीदतीति वेदिषत्, इयं वेदिः परोऽन्तः पृथिव्याः (ऋ.वेद) इति मन्त्र-वर्णात्।

अतिथिः सोमः सन् दुरोणे कलशे सीदतीति दुरोणसत्।

ब्राह्मणोऽतिथि-रूपेण वा दुरोणेषु गृहेषु सीदतीति।

नृषत् नृषु मनुष्येषु सीदतीति नृषत्।

वरसत् वरेषु देवेषु सीदतीति।

ऋतसत् ऋतं सत्यं यज्ञो वा, तस्मिन् सीदतीति।

व्योमसत् व्योम्नि आकाशे सीदतीति व्योमसत्।

अब्जाः अप्सु शङ्ख-शुक्ति-मकरादि-रूपेण जायत इति।

गोजाः गवि पृथिव्यां व्रीहि-यवादि-रूपेण जायत इति।

ऋतजाः यज्ञाङ्ग-रूपेण जायत इति।

अद्रिजाः पर्वतेभ्यो नद्यादि-रूपेण जायत इति।

सर्वात्मापि सन् ऋतम् अवितथ-स्वभाव एव।

बृहद् महान्, सर्व-कारणत्वात्।

यदाप्यादित्य एव मन्त्रेणोच्यते तदापि अस्य आत्म-स्वरूपत्वम् आदित्यस्याङ्गीकृतत्वाद् ब्राह्मण-

व्याख्यानेऽप्यविरोधः।

सर्वथापि एक एवात्मा जगतः, नात्म-भेद इति मन्त्रार्थः।। २ ।।

**आनन्दगिरिटीका**

या यज्ञे प्रसिद्धा वेदिः पृथिव्याः परोऽन्तः परः स्वभावः (अपरं रूपमित्यर्थः) इति वेद्याः पृथिवी-स्वभावत्व-संकीर्तनात् पृथिवी वेदिशब्दवाच्या भवति इत्यर्थः। असौ वा आदित्यो हंसः शुचिषदिति ब्राह्मणेन आदित्यो मन्त्रार्थतया व्याख्यातः। कथं तद्विरुद्धमिदं व्याख्यातम् इत्याशङ्क्याह - **यदापि आदित्य एव** इति। सूर्य आत्मा जगतस्तस्थुषश्च (जगतः जङ्गमस्य, तस्थुषः स्थावरस्य) इति मन्त्राद् मण्डलोपलक्षितस्य चिद्धातोः इष्यते एव सर्वात्मत्वम् इत्यर्थः। (२)

आत्मनः स्वरूपाधिगमे लिङ्गमुच्यते -

**ऊर्ध्वं प्राणमुन्नयति। अपानं प्रत्यगस्यति।**

**मध्ये वामनमासीनं विश्वे देवा उपासते।। २.२.३ ।।**

प्राणम् ऊर्ध्वम् उन्नयति। अपानं (च) प्रत्यक् अस्यति। मध्ये आसीनं (तं) वामनम् विश्वे देवाः उपासते।

ऊर्ध्वं हृदयात् प्राणं प्राण-वृत्तिं वायुम् उन्नयति ऊर्ध्वं गमयति।

तथा अपानं प्रत्यक् अधः अस्यति क्षिपति, यः इति वाक्य-शेषः।

तं मध्ये हृदय-पुण्डरीकाकाशे आसीनं बुद्धावभिव्यक्त-विज्ञान-प्रकाशं वामनं (वननीयं) सम्भजनीयं विश्वे

सर्वे देवाः चक्षुरादयः प्राणाः रूपादि-विज्ञानं बलिमुपाहरन्तो विशः इव राजानम् उपासते।

तादर्थ्येनानुपरत-व्यापारा भवन्तीत्यर्थः।

यदर्था यत्प्रयुक्ताश्च सर्वे वायु-करण-व्यापाराः, सोऽन्यः सिद्ध इति वाक्यार्थः।। ३ ।।

**आनन्दगिरिटीका**

येयं प्रेते विचिकित्सा मनुष्ये इति या पूर्वं विचिकित्सा प्रश्नमूलत्वेन उद्भाविता साऽपि निर्मूला इत्येतद् दर्शयितुं देहव्यतिरिक्तात्मास्तित्वं साधयति - **आत्मनः स्वरूपाधिगम** इत्यादिना। सर्वे प्राणकरणव्यापाराः चेतनार्थाः तत्प्रयुक्ताः भवितुमर्हन्ति जडचेष्टात्वाद् रथचेष्टावदित्यर्थः। (३)

किञ्च -

**अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः।**

**देहाद् विमुच्यमानस्य किमत्र परिशिष्यते। एतद्वै तत्।। २.२.४ ।।**

शरीरस्थस्य अस्य (पूर्वोक्तस्य) देहिनः विस्रंसमानस्य देहाद् विमुच्यमानस्य (सतः) अत्र (देहे) किं परिशिष्यते। (न किंचिदपि)। (देहाद् निर्गते आत्मनि देहस्य काष्ठवद् दाहयोग्यत्वदर्शनाद् देहादन्यः देहस्थितिहेतुः आत्मा इति सिद्धः।) एतद्वै तत्।।

**शरीरे तिष्ठति इति शरीरस्थः। देहः अस्यास्ति इति देहिन्। (वि) स्रंस् - १ आ.पद. भाष्यम्**

अस्य शरीरस्थस्य आत्मनः विस्रंसमानस्य अवस्रंसमानस्य भ्रंशमानस्य देहिनः देहवतः।

विस्रंसन-शब्दार्थमाह - देहाद्विमुच्यमानस्य इति। किमत्र परिशिष्यते प्राणादि-कलापे न किञ्चन परिशिष्यते।

अत्र देहे, पुर-स्वामिनो विद्रवणे इव पुर-वासिनां, यस्यात्मनोऽपगमे क्षण-मात्रात्कार्य-करण-कलाप-रूपं

सर्वमिदं हत-बलं विध्वस्तं भवति, विनष्टं भवति, सोऽन्यः सिद्ध आत्मा।। ४ ।।

**आनन्दगिरिटीका**

शरीरं चेतनशेषं तद्विगमे भोगानर्हत्वाद् राजपुरवद् इत्याह - **किञ्चास्य** इति। (४)

**आक्षेपः**

स्यान्मतं प्राणापानाद्यपगमादेवेदं विध्वस्तं भवति, न तु तद्व्यतिरिक्तात्मापगमात्, प्राणादिभिरेव हि मर्त्यो जीवतीति।

**समाधानम्**

नैतदस्ति -

**न प्राणेन नापानेन मर्त्यो जीवति कश्चन।**

**इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ।। २.२.५ ।।**

कश्चन मर्त्यः प्राणेन न जीवति। अपानेन (च) न (जीवति)। तु इतरेण (प्राणादि विलक्षणेन चैतन्येन) जीवन्ति (स्थितिं लभन्ते) यस्मेन एतौ उपाश्रितौ।

न प्राणेन नापानेन चक्षुरादिना वा मर्त्यः मनुष्यो देहवान् कश्चन जीवति।

न कोऽपि जीवति।

न हि एषां परार्थानां संहत्य-कारित्वाज्ञीवन-हेतुत्वमुपपद्यते।

स्वार्थेनासंहतेन परेण केनचिदप्रयुक्तं संहतानामवस्थानं न दृष्टं यथा गृहादीनां लोके।

तथा प्राणादीनाम् अपि संहतत्वाद् भवितुमर्हति।

अतः इतरेण एव संहत-प्राणादि-विलक्षणेन तु सर्वे संहताः सन्तः जीवन्ति प्राणान्धारयन्ति।

यस्मिन् संहत-विलक्षणे आत्मनि सति परस्मिन् एतौ प्राणापानौ चक्षुरादिभिः संहतौ उपाश्रितौ।

यस्य असंहतस्यार्थे प्राणापानादिः स्व-व्यापारं कुर्वन् वर्त्तते संहतः सन्, स ततोऽन्यः सिद्ध इत्यभिप्रायः।।

५ ।।

**आनन्दगिरिटीका**

(हेतोः) अन्यथासिद्धिं शङ्कते - **स्यान्मतम्** इति। ननु जीव प्राणधारणे इति स्मरणात् शरीरस्य जीवनं नाम प्राणधारणं प्राणसंयोगश्च प्राणधारणं कुण्डे दधिधारणवत्। तत्र च प्राणस्यैव हेतुत्वं संयोगाश्रयत्वात्। कथमुच्यते जीवनहेतुत्वं प्राणादीनां न सम्भवति इति। तत्राह - **स्वार्थेन असंहतेन** इति। कादाचित्कस्य प्राणशरीरसंयोगस्य स्वभावतोऽनुपपत्तेः सङ्घातस्य च लोके परप्रयुक्तस्यैव दर्शनाद् भवितव्यमन्येन सङ्घातप्रयोजकेन इत्यर्थः। (५)

**हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्।**

**यथा च मरणं प्राप्य आत्मा भवति गौतम।। २.२.६ ।।**

हे गौतम हन्त ते इदं गुह्यं सनातनं ब्रह्म प्रवक्ष्यामि। आत्मा मरणं प्राप्य च यथा भवति (संसरति) (तच्च प्रवक्ष्यामि)।

हन्त इदानीं पुनरपि ते तुभ्यम् इदं गुह्यं गोप्यं ब्रह्म सनातनं चिरन्तनं प्रवक्ष्यामि।

यद्विज्ञानात् सर्व-संसारोपरमो भवति, अविज्ञानाच्च यस्य मरणं प्राप्य यथा आत्मा भवति यथा संसरति,

तथा श्रृणु हे गौतम।। ६ ।।

**आनन्दगिरिटीका**

येयं प्रेते इति प्रष्टुः परलोके अस्तित्वेऽपि (परलोके देहातिरिक्तस्यात्मनः अस्तित्वेऽपि इत्यर्थः। स्थाण्वादिविशेषरूपेण अस्तित्वे तु किमु वक्तव्यमित्यर्थः। परलोकास्तित्वेऽपि इति वा पाठः।) सन्देह आसीत्। विशेषतः तन्निवृत्त्यर्थमुच्यते इत्याह - **हन्त इदानीमिति**। (६)

**याोनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।**

**स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्।। २.२.७।।**

अन्ये (केचन, केचिदज्ञाः) देहिनः यथाकर्म यथाश्रुतं (स्वस्वकर्मविद्यानुसारेण - यादृशं कर्म कृतं यादृशं विहितं प्रतिषिद्धं वा ज्ञानं सम्पादितं तदनुरूपम्) योनिं प्रपद्यन्ते। अन्ये (अत्यन्तपापिष्ठाः) स्थाणुम् अनुसंयन्ति (प्राप्नुवन्ति)। शरीरत्वाय - शरीरग्रहणार्थम्। योनिं - शुक्ररूपेण स्त्रीयोनिम्।

योनिं योनि-द्वारं शुक्र-बीज-समन्विताः सन्तः अन्ये केचिदविद्यावन्तो मूढाः प्रपद्यन्ते शरीरत्वाय शरीर-ग्रहणार्थं देहिनः देहवन्तः योनिं प्रविशन्तीत्यर्थः।

स्थाणुं वृक्षादि-स्थावर-भावम् अन्ये अत्यन्ताधमा मरणं प्राप्य अनुसंयन्ति अनुगच्छन्ति।

यथाकर्म यद्यस्य कर्म तद्यथा-कर्म, यैर्यादृशं कर्म इह जन्मनि कृतं तद्वशेनेत्येतत्।

तथा यथाश्रुतं यादृशं च विज्ञानमुपार्जितं तदनुरूपमेव शरीरं प्रतिपद्यन्ते इत्यर्थः।

यथाप्रज्ञं हि सम्भवाः (ऐ.आ. २.३.२) इति श्रुत्यन्तरात्।। ७ ।।

यत्प्रतिज्ञातं गुह्यं ब्रह्म प्रवक्ष्यामि इति तदाह -

**य एष सुप्तेषु जागर्त्ति कामं कामं पुरुषो निर्मिमाणः।**

**तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते।**

**तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन।।**

**एतद्वै तत्।। २.२.८ ।।**

य एष पुरुषः (करणेषु) सुप्तेषु जागर्त्ति। (स्वप्नावस्थायाम्) कामं कामं (स्वप्नविषयान्) निर्मिमाणः (जागर्त्ति)। तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते। तस्मिन् (अवस्थात्रयसाक्षिणि ब्रह्मणि) सर्वे लोकाः श्रिताः। कश्चन (पदार्थः विषयो वा) तद् (ब्रह्म चैतन्यम्) न उ (नैव) अत्येति (अतीत्य गच्छति) ।।

निर्मि - ३-वां गण। माने शब्दे च। (४-वां च)। जागृ निद्राक्षये २-वां गण। जागर्ति जगृतः जाग्रति।

यः एषः सुप्तेषु प्राणादिषु जागर्ति न स्वपिति।

कथम् कामं कामं तं तमभिप्रेतं स्त्र्याद्यर्थमविद्यया निर्मिमाणः निष्पादयन्, जागर्ति पुरुषः यः, तदेव शुक्रं

शुभ्रं शुद्धं तद् ब्रह्म नान्यद् गुह्यं ब्रह्मास्ति। तदेव अमृतम् अविनाशी उच्यते सर्व-शास्त्रेषु।

किञ्च, पृथिव्यादयो लोकाः तस्मिन् एव सर्वे ब्रह्मणि आश्रिताः, सर्व-लोक-कारणत्वात् तस्य।

तदु नात्येति कश्चन इत्यादि पूर्ववदेव।। ८ ।।

अनेक-तार्किक-कुबुद्धि-विचालितान्तःकरणानां प्रमाणोपपन्नमप्यात्मैकत्व-विज्ञानम् असकृदुच्यमानमपि अनृजु-बुद्धीनां ब्राह्मणानां चेतसि नाधीयते इति तत्प्रतिपादने आदरवती पुनः पुनराह श्रुतिः -

**अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।**

**एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च।। २.२.९ ।।**

**एकः (सर्वदाह्यवस्तु-अन्तरात्मा) अग्निः यथा भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव**

**तथा एकः सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो (बभूव)। बहिः च।। २.२.९ ।।**

अग्निः यथा एकः एव प्रकाशात्मा सन् भुवनं भवन्त्यस्मिन्भूतानीति भुवनम्, अयं लोकः, तमिमं प्रविष्टः अनुप्रविष्टः, रूपं रूपं प्रति, दार्वादि-दाह्य-भेदं प्रतीत्यर्थः।

प्रतिरूपः तत्र तत्र प्रतिरूपवान् दाह्य-भेदेन बहु-विधो बभूव।

एकः एव तथा सर्वभूतान्तरात्मा सर्वेषां भूतानामभ्यन्तर आत्मा अतिसूक्ष्मत्वाद् दार्वादिषु इव सर्व-देहं प्रति प्रविष्टत्वात् प्रतिरूपः बभूव, बहिश्च स्वेनाविकृतेन रूपेण आकाशवत्।। ९ ।।

**आनन्दगिरिटीका**

जन्म-मरणकरणानां प्रति(प्राणि)नियमाद् अयुगपत्प्रवृत्तेश्च पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्च इति नानात्मानः व्यवस्थिताः इति अनेकतार्किकबुद्धिविरोधात् सर्वपुरवर्त्येक एव आत्मा इत्यत्र न चित्तस्थैर्यं सम्भवति इत्याशङ्क्य औपाधिकभेदसाधने सिद्धसाधनं स्वाभाविकभेदसाधने च अनैकान्तिकत्वं दर्शयितुं प्रक्रमते - **अनेकतार्किकेत्यादिना**। प्रतिरूप उपाधिसदृशः चतुष्कोणत्वादिधर्मके हि दारुणि तद्रूपो वह्निरपि लक्ष्यते इत्यर्थः। (९)

तथान्यो दृष्टान्तः -

**वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।**

**एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च।। २.२.१० ।।**

एकः () वायुः यथा भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव तथा एकः सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो (बभूव)। बहिः च।। २.२.९ ।।

वायुर्यथैकः इत्यादि।

प्राणात्मना देहेष्वनुप्रविष्टः।

रूपं रूपं प्रतिरूपो बभूव इत्यादि समानम्।। १० ।।

एकस्य सर्वात्मत्वे संसार-दुःखित्वं परस्यैव स्याद् इति प्राप्तम्।

अत इदमुच्यते -

**सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः।**

**एकस्तथा सर्वभूतान्तारात्मा न लिप्यते लोकदुःखेन बाह्यः।। २.२.११ ।।**

यथा सूर्यः (सूर्यप्रकाशः) सर्वलोकस्य चक्षुः (सन्) चाक्षुषैर्बाह्यदोषैः न लिप्यते तथा एकः सर्वभूतान्तारात्मा लोकदुःखेन न लिप्यते, (यस्मात्) बाह्यः।। २.२.११ ।।

**नेक्षते उद्यन्तं आदित्यं अस्तमयन्तं कदाचन। न वारिस्थं न मध्यस्थं नभस्थम्। इति। उदयसूर्यः न द्रष्टव्यः, न माध्याह्नसूर्यः न च अस्तमयसूर्यः। भाष्यम्**

सूर्यः यथा चक्षुष आलोकेनोपकारं कुर्वन् मूत्र-पुरीषाद्यशुचि-प्रकाशनेन तद्दर्शिनः सर्वलोकस्य चक्षुः अपि सन् न लिप्यते चाक्षुषैः अशुच्यादि-दर्शन-निमित्तैः आध्यात्मिकैः पाप-दोषैः बाह्यैश्च अशुच्यादि-संसर्ग-दोषैः।

एकः सन् तथा सर्व-भूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः।

लोको हि अविद्यया स्वात्मन्यध्यस्तया काम-कर्मोद्भवं दुःखमनुभवति।

न तु सा परमार्थतः स्वात्मनि।

यथा रज्जु-शुक्तिकोषर-गगनेषु सर्प-रजतोदक-मलानि न रज्ज्वादीनां स्वतो दोष-रूपाणि सन्ति, संसर्गिणि

विपरीत-बुद्ध्यध्यास-निमित्तात् तद्दोषवद्विभाव्यन्ते, न तद्दोषैस्तेषां लेपः।

विपरीत-बुद्ध्यध्यास-बाह्या हि ते। तथा आत्मनि सर्वो लोकः क्रिया-कारक-फलात्मकं विज्ञानं सर्पादि-

स्थानीयं विपरीतम् अध्यस्य तन्निमित्तं जन्म-मरणादि-दुःखमनुभवति।

न त्वात्मा सर्व-लोकात्मापि सन् विपरीताध्यारोप-निमित्तेन लिप्यते लोक-दुःखेन।

कुतः बाह्यः रज्ज्वादिवद् एव विपरीत-बुद्ध्यध्यास-बाह्यो हि स इति।। ११ ।।

**आनन्दगिरिटीका**

परमात्मा दुःखी स्याद् दुःखाभिन्नत्वाद् लोकवदित्याह - **एकस्य सर्वात्मत्वे** इति। अविद्यायां प्रतिबिम्बितः चिद्धातुः अज्ञो भ्रान्तः भवति। भ्रान्तश्च कामादिदोशप्रयुक्तः कर्म कुरुते। तन्निमित्तं च दुःखं स्वात्मनि अध्यस्यति। परमात्मा तु निरविद्यत्वाद् दुःखसाधनशून्यत्वाद् न दुःखी। ततो न प्रयोजको हेतुः इत्याह - **लोको हि अविद्यया** इति। स्वरूपेण भ्रमाविषयत्वं विपरीतबुद्ध्यध्यासबाह्यत्वं रज्ज्वादीनां तथा चैतन्यस्य उपाधिस्वरूपेण अध्यासाश्रयत्वेऽपि निरुपाधिकबिम्बकल्पब्रह्मरूपेण अध्यासानाश्रयत्वाद् न दुःखित्वप्राप्तिः इत्यर्थः। (११)

किञ्च -

**एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति।**

**तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्।। २.२.१२ ।।**

यः एकः वशी (मिथ्यावस्तुनः), सर्वभूतान्तरात्मा एकं रूपं (मायया) बहुधा करोति। तम् आत्मस्थं (शरीरस्थम्) ये धीराः (अधिकारिणः) अनुपश्यन्ति तेषां शाश्वतं सुखम्। नेतरेषाम्।। २.२.१२ ।।

स हि परमेश्वरः सर्वगतः स्वतन्त्रः एकः।

न तत्समोऽभ्यधिको वाऽन्योऽस्ति।

वशी सर्वं हि अस्य जगद्वशे वर्त्तते।

कुतः सर्वभूतान्तरात्मा।

यतः एकम् एव सदैकरसम् आत्मानं विशुद्ध-विज्ञान-रूपं नाम-रूपाद्यशुद्धोपाधि-भेद-वशेन बहुधा अनेक-

प्रकारं यः करोति स्वात्म-सत्ता-मात्रेण अचिन्त्य-शक्तित्वात्।

तम् आत्मस्थं स्व-शरीर-हृदयाकाशे बुद्धौ चैतन्याकारेणाभिव्यक्तम् इत्येतत्।

न हि शरीरस्याधारत्वम् आत्मनः, आकाशवद् अमूर्त्तत्वात्।

आदर्शस्थं मुखमिति यद्वत्।

तमेतम् ईश्वरमात्मानं ये निवृत्त-बाह्य-वृत्तयः अनुपश्यन्ति आचार्यागमोपदेशमनु साक्षाद् अनुभवन्ति धीराः

विवेकिनः, तेषां परमेश्वर-भूतानां शाश्वतं नित्यं सुखम् आत्मानन्द-लक्षणं भवति।

नेतरेषां बाह्यासक्त-बुद्धीनामविवेकिनां स्वात्मभूतमपि, अविद्या-व्यवधानात्।। १२ ।।

**आनन्दगिरिटीका**

परोत्कर्षदर्शनं पारतन्त्र्यं च स्वस्य हीनत्वं दुःखकारणत्वं प्रसिद्धं तदभावाद् न परमात्मा दुःखी। ततः तत्प्राप्तिः परः पुरुषार्थः भविष्यति इत्याह - **किञ्च स हि** इत्यादिना।

किञ्च -

**नित्योऽनित्यानां चेतश्चेतनानामेको बहूनां यो विदधाति कामान्।**

**तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम्।। २.२.१३ ।।**

अनित्यानां नित्यः चेतनानाम् चेतनः बहूनां एकः यो (एकः सन् बहूनां) कामान् विदधाति तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम्।। २.२.१३ ।।

नित्यः अविनाशी अनित्यानां विनाशिनाम्।

चेतनः चेतनानां चेतयितॄणां ब्रह्मादीनां प्राणिनाम्।

अग्नि-निमित्तम् इव दाहकत्वमनग्नीनामुदकादीनाम्, आत्म-चैतन्य-निमित्तमेव चेतयितृत्वमन्येषाम्।

किञ्च, सः सर्वज्ञः सर्वेश्वरः कामिनां संसारिणां कर्मानुरूपं कामान् कर्म-फलानि स्वानुग्रह-निमित्तांश्च

कमान् यः एको बहूनाम् अनेकेषाम् अनायासेन विदधाति प्रयच्छति इत्येतत्।

तम् आत्मस्थं ये अनुपश्यन्ति धीराः, तेषां शान्तिः उपरतिः शाश्वती नित्या स्वात्म-भूतैव स्यात्।

न इतरेषाम् अनेवं-विधानाम्।। १३ ।।

**आनन्दगिरिटीका**

इदानीं परमात्मनि उपपत्तिप्रदर्शनार्थमाह - **किंच नित्य** इति। सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयद् इत्यादिश्रुतेः अकृताभ्यागम-कृतविप्रणाश-प्रसङ्गपरिहाराच्च कल्पान्तरीयभावानां प्रलीनानां कल्पान्तरे सजातीयरूपेण उत्पादः प्रतीयते। स तदा स्याद् यदि विनाशिनां भावानां शक्तिशेषो लयः स्यात्। ततः प्रलये विनश्यत् सर्वं यत्र शक्तिशेषं विलीयते सः अभ्युपगन्तव्यः इत्यर्थः। बुद्धिमतामपि ब्रह्मेन्द्रादीनां परमानन्दाभिमुख्यं हित्वा या बहिर्मुखा चेतनोपलभ्यते सापि नियन्तारं गमयति इत्याह - **चेतनः चेतनानाम्** इति। ब्रह्मादिशब्दवाच्यानां संघातानां वा चेतयितृत्वं यच्चैतन्यनिमित्तं सः अस्ति पर आत्मा इत्यर्थः। विमतं कर्मफलं तत्स्वरूपाद्यभिज्ञेन दीयमानं व्यवहितफलत्वात् सेवाफलवद् इत्याह - **किंच स** इति।

**तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम्।**

**कथं नु तद्विजानीयां किमु भाति विभाति वा।। २.२.१४ ।।**

परमं सुखम् अनिर्देश्यम्। तत् (परमानन्दः) एतद् (आत्मा, अहम्) इति (धीराः) मन्यन्ते । तत् कथं नु विजानीयाम्, किमु भाति विभाति वा (इति नचिकेताः पृच्छति)।। २.२.१४ ।।

यत्तदात्म-विज्ञानं सुखम् अनिर्देश्यं निर्देष्टुमशक्यं परमं प्रकृष्टं प्राकृत-पुरुष-वाङ्-मनसयोरगोचरमपि सद्

निवृत्तैषणाः ये ब्राह्मणास्ते तदेतत् प्रत्यक्षमेव इति मन्यन्ते।

कथं नु केन प्रकारेण तत् सुखमहं विजानीयाम् इदमित्यात्म-बुद्धि-विषयमापादयेयं यथा निवृत्त-विषयैषणाः

यतयः।

किमु तत् भाति दीप्यते प्रकाशात्मकं तत् यतोऽस्मद्-बुद्धि-गोचरत्वेन विभाति विस्पष्टं दृश्यते किं वा

नेति।। १४ ।।

**आनन्दगिरिटीका**

विद्वदनुभवोऽपि परमानन्दे प्रमाणमित्याह - **यत्तद् आत्मविज्ञानम्** इति। तस्माद् असम्भावततया न जिहासितव्यं परमानन्ददर्शनं किन्तु श्रद्दधानतया विचारयितव्यमेव इत्याह - **कथं न्विति**। (१४)

अत्रोत्तरमिदं भाति च विभाति चेति। ’

कथम् -

**न तत्र सूर्यो भाति न चन्द्रतारकम् नेमा विद्युतो भान्ति कुतोऽयमग्निः।**

**तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति।। २.२.१५।।**

न तत्र सूर्यो भाति न चन्द्रतारकम् नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति।। २.२.१५।।

।। इति द्वितीयेऽध्याये द्वितीया वल्ली ।।

न तत्र तस्मिन् स्वात्म-भूते ब्रह्मणि सर्वावभासकोऽपि सूर्यः भाति तद् ब्रह्म न प्रकाशयतीत्यर्थः।

तथा न चन्द्रतारकम्।

नेमा विद्युतो भान्ति।

कुतः अयम् अस्मद्दृष्टि-गोचरः अग्निः।

किं बहुना यदिदमादित्यादिकं सर्वं भाति तत् तमेव परमेश्वरं भान्तं दीप्यमानम् अनुभाति अनुदीप्यते।

यथा जलोल्मुकादि अग्नि-संयोगादग्निं दहन्तमनु दहति न स्वतः, तद्वत्।

तस्य एव भासा दीप्त्या सर्वम् इदं सूर्यादि विभाति।

यत एवं तदेव ब्रह्म भाति च विभाति च।

कार्य-गतेन विविधेन भासा तस्य ब्रह्मणो भा-रूपत्वं स्वतोऽवगम्यते।

न हि स्वतोऽविद्यमानं भासनमन्यस्य कर्त्तुं शक्यम्।

घटादीनामन्यावभासकत्वादर्शनात्। भा-रूपाणां च आदित्यादीनां तद्दर्शनात्।। १५ ।।

।। इति पञ्चमवल्लीभाष्यम् ।।

## अध्याय २ वल्ली ३

तूलावधारणेनैव मूलावधारणं वृक्षस्य यथा क्रियते लोके, एवं संसार-कार्य-वृक्षावधारणेन तन्मूलस्य

ब्रह्मणः स्वरूपावदिधारयिषया इयं षष्ठी वल्ल्यारभ्यते -

**ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः।**

**तदेव शुक्रं तद् ब्रह्म। तदेवामृतमुच्यते।**

**तस्मिँल्लोकाः श्रिताः सर्वे। तदु नात्येति कश्चन। एतद्वै तत्।। २.३.१ ।।**

एषः (संसारवृक्षः) अश्वत्थः (इव) ऊर्ध्वमूलः अवाक्शाखः सनातनः। तदेव शुक्रम्। तद् ब्रह्म। तदेवामृतमुच्यते। तस्मिन् सर्वे लोकाः श्रिताः। तदु कश्चन नात्येति। एतद्वै तत्।। २.३.१ ।।

**आक्रोशन ताडन हाहाहूहू मुञ्च मुञ्च इति तुमुलीभूतमहारवः भाष्यम्**

ऊर्ध्वमूलः ऊर्ध्वं मूलं यत् तद्विष्णोः परमं पदमस्येति सोऽयम् अव्यक्तादि-स्थावरान्तः संसार-वृक्षः ऊर्ध्व-

मूलः।

वृक्षश्च व्रश्चनात् विनश्वरत्वात्।

अविच्छिन्न-जन्म-जरा-मरण-शोकाद्यनेकानर्थात्मकः, प्रतिक्षणम् अन्यथा-स्वभावः माया-मरीच्युदक-गन्धर्व-नगरादिवद् दृष्ट-नष्ट-स्वरूपत्वाद्, अवसाने च वृक्षवद् अभावात्मकः, कदली-स्तम्भवन्निः-सारः, अनेक-शत-पाषण्ड-बुद्धि-विकल्पास्पदः, तत्त्व-विजिज्ञासुभिः अनिर्धारितेदं-तत्त्वः, वेदान्त-निर्धारित-पर-ब्रह्म-मूल-सारः, अविद्या-काम-कर्माव्यक्त-बीज-प्रभवः अपर-ब्रह्म-विज्ञान-क्रिया-शक्ति-द्वयात्मक-हिरण्यगर्भाङ्कुरः सर्व-प्राणि-लिङ्ग-भेद-स्कन्धः तत्तत्तृष्णा-जलासेकोद्भूत-दर्पः बुद्धीन्द्रिय-विषय-प्रवालाङ्कुरः, श्रुति-स्मृति-न्याय-विद्योपदेश-पलाशः, यज्ञ-दान-तप-आद्यनेक-क्रिया-सुपुष्पः सुख-दुःख-वेदनानेक-रसः प्राण्युपजीव्यानन्त-फलः तत्तत्तृष्णा-सलिलावसेक-प्ररूढ-जटिली-कृत-दृढ-बद्ध-मूलः सत्य-नामादि-सप्त-लोक-ब्रह्मादि-भूत-पक्षि-कृत-नीडः प्राणि-सुख-दुःखोद्भूत-हर्ष-शोक-जात-नृत्य-गीत-वादित्र-क्ष्वेलितास्फोटित-हसिताक्रुष्ट-रुदित-हाहा-मुञ्च-मुञ्चेत्याद्यनेक-शब्द-कृत-तुमुली-भूत-महा-रवः वेदान्त-विहित-ब्रह्मात्म-दर्शनासङ्ग-शस्त्र-कृतोच्छेदः एषः संसार-वृक्षः अश्वत्थः अश्वत्थवत् काम-कर्म-वातेरित-नित्य-प्रचलित-स्वभावः।

स्वर्ग-नरक-तिर्यक्-प्रेतादिभिः शाखाभिः अवाक्-शाखः अवाञ्चः शाखा यस्य सः।

सनातनः अनादित्वाच्चिर-प्रवृत्तः।

यदस्य संसार-वृक्षस्य मूलं तदेव शुक्रं शुभ्रं शुद्धं ज्योतिष्मत् चैतन्यात्म-ज्योतिः-स्वभावं तद् एव ब्रह्म

सर्व-महत्त्वात्।

तदेव अमृतम् अविनाश-स्वभावम् उच्यते कथ्यते सत्यत्वात्।

वाचारम्भणं विकारो नामधेयम् (छा. ६.१.४) अनृतमन्यदतो मर्त्यम्।

तस्मिन् परमार्थ-सत्ये ब्रह्मणि लोकाः गन्धर्व-नगर-मरीच्युदक-माया-समाः परमार्थ-दर्शनाभावावगमनाः

श्रिताः आश्रिताः सर्वे समस्ताः उत्पत्ति-स्थिति-लयेषु।

तदु तद् ब्रह्म नात्येति नातिवर्त्तते मृदादिम् इव घटादि-कार्यं कश्चन कश्चिदपि विकारः।

एतद्वै तत्।। १ ।।

**आनन्दागिरिटीका**

शाल्मल्यादितूलदर्शनेन अदृष्टमपि वृक्षमूलं यथा अस्तीत्यवधार्यते तद्वद् अदृष्टस्यापि ब्रह्मणः अवधारणाय प्रक्रमते - **तूलावधारणेन** इति। वृक्षशब्दे प्रवृत्तिनिमित्तमाह - **व्रश्चनाद्** इति। ओव्रश्चू छेदने। अस्य धातोः सप्रत्ययान्तस्य रूपं वृक्ष इति। छेद्यत्वे युक्तिमाह - **जन्मजरेत्यादिना**। प्रसिद्धवृक्षसाम्याद् वा वृक्षशब्दप्रयोग इत्यभिप्रेत्याह - **अवसाने च** इत्यादिना। प्रसिद्धो वृक्षश्च स्थाणुर्वा पुरुषो वेति विकल्पास्पदो दृष्टः। तथा अयमपि संघातो वा परिणामो वा आरब्धो वा सद्वा असद्वा इत्यादीनामनेकेषां शतसंख्याकपाखण्डबुद्धिविकल्पानां विषय इत्यर्थः। किंसंज्ञकोऽयं वृक्ष इत्यनध्यवसायगोचरः कश्चिद्वृक्षो दृष्टः तथा अयमपि इति साम्यान्तरमाह - **तत्वजिज्ञासुभिः** इति। अपरब्रह्मणो विज्ञानक्रियाशक्तिद्वयात्मको हिरण्यगर्भः प्रथमोऽवस्थाभेदः अङ्कुरः अस्य इति तथोक्तः। बुद्धीन्द्रियाणां विषयाः शब्दादयः प्रवालाङ्कुराः किसलयानि अस्य इति स तथोक्तः। श्रुत्यादीनि पलाशानि पत्राणि अस्य इति। सुखदुःखे प्राणिवेदना एव अनेको रसोऽस्य इति। फलतृष्णैव सलिलावसेकः तेन प्ररूढानि कर्मवासनादीनि सात्त्विकादिभावेन मिश्रीकृतानि दृढबन्धनानि अवान्तरमूलानि अस्य वटवृक्षस्य एव तथोक्तः। सत्य-नामादिषु सप्तलोकेषु ब्रह्मादीनि भूतान्येव पक्षिणः तैः कृतं नीडं यस्मिन्। प्राणिनां सुख-दुखाभ्यामुद्भूतौ हर्षशोकौ ताभ्यां यथासंख्येन जातानि नृत्यादीनि रुदितादिशब्दाश्च एतैः कृतस्तुमुलीभूतो महारवो यस्मिन् इति विग्रहः। (१)

यद्विज्ञानादमृता भवन्तीत्युच्यते, जगतो मूलं तदेव नास्ति ब्रह्म। असत एवेदं निःसृतमिति, तन्न -

**यदिदं किञ्च जगत् सर्वं प्राण एजति निःसृतम्।**

**महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति।। २.३.२ ।।**

यत्किञ्च इदं सर्वं जगत् प्राणे एजति निःसृतम्। यः एतद् महद्भयं वज्रमुद्यतं विदुः ते अमृताः भवन्ति।। २.३.२ ।।

यदिदं किञ्च यत्किञ्चेदं जगत्सर्वं प्राणे परस्मिन्ब्रह्मणि सति एजति कम्पते।

तत एव निःसृतं निर्गतं सत् प्रचलति नियमेन चेष्टते।

यदेवं जगदुत्पत्त्यादि-कारणं ब्रह्म तद् महद्भयं महच्च तद् भयं च, बिभेत्यस्मादिति महद्भयम्।

वज्रमुद्यतम् उद्यतम् इव वज्रम्।

यथा वज्रोद्यत-करं स्वामिनम् अभिमुखी-भूतं दृष्ट्वा भृत्या नियमेन तच्छासने वर्त्तन्ते, तथेदं चन्द्रादित्य-ग्रह-

नक्षत्र-तारकादि-लक्षणं जगत्सेश्वरं नियमेन क्षणमपि अविश्रान्तं वर्त्तते इत्युक्तं भवति।

ये एतद्विदुः स्वात्म-प्रवृत्ति-साक्षि-भूतम् एकं ब्रह्म अमृताः अमरण-धर्माणः ते भवन्ति।। २ ।।

**आनन्दागिरिटीका**

कार्यस्य शून्यतापर्यन्तं नष्टस्य असत्त्वपूर्वकमेव जन्म, ततो नास्ति मूलमिति शङ्कते - **यद्विज्ञानाद्** इति। तन्न। शशविषाणादेः असतः समुत्पत्त्यदर्शनात् सत्पूर्वकत्वप्रसिद्धेः च अस्ति सद्रूपं वस्तु जगतो मूलं, तच्च प्राणपदलक्ष्यं प्राणप्रवृत्तेरपि हेतुत्वादित्यर्थः। (२)

कथं तद्भयाज्जगद्वर्त्तत इति, आह -

**भयादस्याग्निस्तपति भयात्तपति सूर्यः।**

**भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः।। २.३.३ ।।**

अस्य भयाद् अग्निः तपति। (अस्य) भयात् सूर्यः तपति। (अस्य) भयात् इन्द्रश्च वायुश्च पञ्चमः मृत्युः (च) धावति ।। २.३.३ ।।

भयाद् भीत्या अस्य परमेश्वरस्य अग्निः तपति।

भयात्तपति सूर्यः।

भयादिन्द्रश्च वायुश्च, मृत्युर्धावति पञ्चमः।

न हि ईश्वराणां लोक-पालानां समर्थानां सतां नियन्ता चेद् वज्रोद्यत-करवन्न स्यात्, स्वामि-भय-भीतानाम्

इव भृत्यानां नियता प्रवृत्तिः उपपद्यते।। ३ ।।

**इह चेदशकद् बोद्धुं प्राक् शरीरस्य विस्रसः।**

**ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते।। २.३.४ ।।**

इह शरीरस्य विस्रसः प्राक् बोद्धुं अशकत् चेत् (अथ सत्यम् अस्ति)। (इह शरीरस्य विस्रसः प्राक् बोद्धुं न अशकत् चेत्) ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते।। २.३.४ ।।

**शरीरस्य विस्रसः प्राक् - बोद्धुं अशकत् चेत् - भाष्यम्**

तच्च इह जीवन्नेव चेत् यदि अशकत् शक्तः सन् जानातीत्येतत्।

भय-कारणं ब्रह्म बोद्धुम् अवगन्तुम्।

प्राक् पूर्वं शरीरस्य विस्रसः अवस्रंसनात्पतनात्, संसार-बन्धनाद्विमुच्यते।

न चेदशकद् बोद्धुम्, ततः अनवबोधात् सर्गेषु सृज्यन्ते येषु स्रष्टव्याः प्राणिन इति सर्गाः, पृथिव्यादयो लोकाः, तेषु सर्गेषु लोकेषु शरीरत्वाय शरीर-भावाय कल्पते समर्थो भवति। शरीरं गृह्णातीत्यर्थः।

तस्माच्छरीर-विस्रंसनात् प्राक् आत्म-बोधाय यत्न आस्थेयः।। ४ ।।

**आनन्दागिरिटीका**

सूर्यादीनां नियतप्रवृत्त्यनुपपत्त्या नियामकत्वेन सम्भावितं यत्पारमेश्वरं रूपं तदवगमाय इहैव यत्नः कर्तव्यः इत्याह - तच्च इति। इहैव बोद्धुं शक्तः सन् इहैव चेद् जानाति तदा मुच्यते एव इति सम्बन्धः। (४)

यस्माद् इहैवात्मनो दर्शनम् आदर्शस्थस्य इव मुखस्य स्पष्टमुपपद्यते, न लोकान्तरेषु ब्रह्म-लोकादन्यत्र, स च दुष्प्रापः।

कथम् इत्युच्यते -

**यथादर्शे तथात्मनि यथा स्वप्ने तथा पितृलोके।**

**यथाप्सु परीव ददृशे तथा गन्धर्वलोके छायातपयोरिव ब्रह्मलोके।। २.३.५।।**

(मनुष्यलोके) यथा आदर्शे तथा आत्मनि (मनसि)। पितृलोके यथा स्वप्ने तथा। गन्धर्वलोके यथा अप्सु परिददृशे इव तथा। ब्रह्मलोके छाया-आतपयोरिव ।। २.३.५।।

यथा आदर्शे प्रतिबिम्ब-भूतमात्मानं पश्यति लोकः अत्यन्त-विविक्तम्, तथा इह आत्मनि स्व-बुद्धौ आदर्शवद् निर्मली-भूतायां विविक्तमात्मनो दर्शनं भवतीत्यर्थः।

यथा स्वप्ने अविविक्तं जाग्रद्वासनोद्भूतम्, तथा पितृलोके अविविक्तमेव दर्शनमात्मनः, कर्म-फलोपभोगासक्तत्वात्।

यथा च अप्सु अविविक्तावयवम् आत्म-रूपं परीव ददृशे परिदृश्यत इव, तथा गन्धर्वलोके अविविक्तमेव दर्शनमात्मनः।

एवं च लोकान्तरेषु अपि शास्त्र-प्रामाण्याद् अवगम्यते।

छाया-तपयोः इव अत्यन्त-विविक्तं ब्रह्मलोके एव एकस्मिन्।

स च दुष्प्रापः, अत्यन्त-विशिष्ट-कर्म-ज्ञान-साध्यत्वात्।

तस्माद् आत्म-दर्शनाय इहैव यत्नः कर्त्तव्यः इत्यभिप्रायः।। ५ ।।

कथमसौ बोद्धव्यः किं वा तदवबोधे प्रयोजनम् इत्युच्यते -

**इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत्।**

**पृथगुत्पद्यमानानां मत्वा धीरो न शोचति।। २.३.६ ।।**

इन्द्रियाणां उदय-(जाग्रत्स्वप्नावस्थायाम्)-अस्तमयौ (सुषप्तौ), पृथगुत्पद्यमानानां पृथग्भावम् च यत् (तत्) मत्वा धीरो न शोचति।। २.३.६ ।।

इन्द्रियाणां श्रोत्रादीनां स्व-स्व-विषय-ग्रहण-प्रयोजनेन स्व-कारणेभ्य आकाशादिभ्यः पृथगुत्पद्यमानानाम् अत्यन्त-विशुद्धात् केवलाच्चिन्मात्रात्म-स्वरूपात् पृथग्भावं स्वभाव-विलक्षणात्मकतां, तथा तेषामेवेन्द्रियाणाम् उदयास्तमयौ च उत्पत्ति-प्रलयौ जाग्रत्स्वापावस्थापेक्षया नात्मन इति मत्वा ज्ञात्वा विवेकतो धीरः धीमान् न शोचति।

आत्मनो नित्यैक-स्वभावस्य अव्यभिचाराच्छोक-कारणत्वानुपपत्तेः।

तथा च श्रुत्यन्तरम् तरति शोकमात्मवित् (छा. ७.१.३) इति।। ६ ।।

यस्मादात्मनः इन्द्रियाणां पृथग्भाव उक्तो नासौ बहिरधिगन्तव्यः यस्मात्प्रत्यगात्मा स सर्वस्य।

तत्कथम् इत्युच्यते -

**इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम्।**

**सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम्।। २.३.७ ।।**

इन्द्रियेभ्यः मनः परम् । मनसः सत्त्वमुत्तमम्। सत्त्वाद् महानात्मा अधि। महतोऽव्यक्तमुत्तमम्।। २.३.७ ।।

इन्द्रियेभ्यः परं मन इत्यादि।

अर्थानामिह इन्द्रिय-समान-जातीयत्वादिन्द्रिय-ग्रहणेनैव ग्रहणम्।

पूर्ववदन्यत्।

सत्त्व-शब्दाद् बुद्धिरिहोच्यते।। ७ ।।

**आनन्दागिरिटीका**

इन्द्रियेभ्यः परा ह्यर्थाः इति पूर्वमुक्तम्। इह तु अर्थानामग्रहणात् सर्वप्रत्यगात्मत्वं सम्भवति इत्याशङ्क्याह - **अर्थानामिह** इति। (७)

**अव्यक्तात् तु परः पुरुषो व्यापकोऽलिङ्ग एव च।**

**यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति।। २.३.८ ।।**

यं ज्ञात्वा जन्तुः मुच्यते अमृतत्वं च गच्छति (सः) पुरुषः अव्यक्तात् तु परः व्यापकोऽलिङ्ग एव च।। २.३.८ ।।
पुरौ वसति इति अथवा सर्वं पूरयति इति वा। पुरुषः पुरुषः इति महावाक्यम्। पुरुषः (जीवः) व्यापकः (परमात्मा) इति वा महावाक्यम्।

अव्यक्तात्तु परः पुरुषः व्यापकः व्यापकस्याप्याकाशादेः सर्वस्य कारणत्वात्।

अलिङ्गः लिङ्ग्यते गम्यते येन तल्लिङ्गं बुद्ध्यादि, तदविद्यमानं यस्य सोऽयमलिङ्गः एव च।

सर्व-संसार-धर्म-वर्जित इत्येतत्।

यं ज्ञात्वा आचार्यतः शास्त्रतश्च मुच्यते जन्तुः अविद्यादि-हृदय-ग्रन्थिभिर्जीवन्नेव।

पतितेऽपि शरीरे अमृतत्वं च गच्छति।

सोऽलिङ्गः परोऽव्यक्तात्पुरुष इति पूर्वेणैव सम्बन्धः।। ८ ।।

**आनन्दागिरिटीका**

बुद्धिसुखदुःखादिः साश्रयः गुणत्वाद् रूपवदिति वैशेषिकाः अनुमिमते, तदसत्। साश्रयत्व-मात्र-साधने सिद्धसाधनत्वात्, मनसः एव कामादिगुणवत्वश्रवणात्, आत्माश्रयत्वकल्पने त निर्गुणत्वशास्त्रविरुद्धत्वात्, आत्मना सह बुद्ध्यादेः अविनाभावाग्रहणाच्च बुद्ध्यादि नात्मलिङ्गमित्याह - **लिङ्ग्यते गम्यते येनेति**।

कथं तर्हि अलिङ्गस्य दर्शनमुपपद्यते इत्युच्यते -

**न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्।**

**हृदा मनीषा मनसाऽभिक्लृप्तो य एतद् विदुरमृतास्ते भवन्ति।। २.३.९ ।।**

अस्य रूपम् (स्वरूपम्) सन्दृशे न तिष्ठति। न कश्चन (पुरुषः) एनं चक्षुषा पश्यति। हृदा मनीषा मनसा (सम्यग्दर्शनेन) अभिक्लृप्तः (अभिप्रकाशितः) (आत्मा प्रकाशते)। ये (अधिकारिणः जिज्ञासवः) एतद् (ब्रह्म आत्मत्वेन) विदुः ते अमृताः भवन्ति।। २.३.९ ।।

**हृत्स्थया बुद्ध्याआवरणभङ्गार्थं बुद्धिः न तु आत्मप्रकाशनार्थम्।आवरणनिवृत्तिः प्रकाश-आदानं चभाष्यम्**

न सन्दृशे सन्दर्शन-विषये न तिष्ठति प्रत्यगात्मनः अस्य रूपम्।

अतः न चक्षुषा सर्वेन्द्रियेण।

चक्षुर्ग्रहणस्योपलक्षणार्थत्वात्।

पश्यति नोपलभते कश्चन कश्चिदपि एनं प्रकृतमात्मानम्।

कथं तर्हि तं पश्येत् इत्युच्यते - हृदा हृत्स्थया बुद्ध्या।

मनीषा मनसः सङ्कल्पादि-रूपस्य ईष्टे नियन्तृत्वेनेति मनीट् तया हृदा मनीषा अविकल्पयित्र्या बुद्ध्या।

मनसा मननरूपेण सम्यग्दर्शनेन।

अभिक्लृप्तः अभिसमर्थितः अभि-प्रकाशितः इत्येतत्।

आत्मा ज्ञातुं शक्यते इति वाक्य-शेषः।

तमात्मानं ब्रह्म एतद् ये विदुः अमृताः ते भवन्ति।। ९ ।।

**आनन्दगिरिटीका**

कथं दर्शनमुपपद्यते इति प्रष्टुः कोऽभिप्रायःकिं विषयतया दर्शनं वक्तव्यम् उत अविषयतयैव दर्शनोपायः वाच्यः। प्रथमं प्रत्याह - **न सन्दृशे** इति। रूपादिमत्तद्विशेषणं च दर्शनविषययोग्यं भवति, तदभावादित्यर्थः। द्वितीयं प्रत्याह - **कथं तर्हि** इति। बाह्यकरणग्रामोपरमेऽपि यदा मनो विषयान् संकल्पयते तदा मुमुक्षोः बुद्धिः तस्य नियन्त्री भवति। हे मनः किमर्थं त्वं पिशाचवत् प्रधावसि। न तावत् स्वप्रयोजनार्थम्। तव जडत्वात् प्रयोजनसम्बन्धानुपपत्तेः, विषयाणां च क्षयिष्णुत्वादि-दोष-दुष्टानां सम्बन्धेन प्रयोजनानुपपत्तेः। नापि चेतनार्थम्। तस्यासङ्गत्वात्, परमानन्दस्वभावत्वाच्चेति नियन्तृत्वेन बुद्धिः मनीडुच्यते इत्याह - **मनस** इति। **अविकल्पयित्रयेति**। विषयकल्पनाशून्यया ब्रह्मास्मीत्यविषयतयैव ब्रह्मभावव्यञ्जिकया महावाक्योत्थया बुद्धिवृत्त्या ज्ञातुं शक्यते इति संबन्धः। कथंभूतः आत्मा इत्यत आह - **मनसा** इति। यद्यन्मया दृश्यते बाह्यं घटादि तत्तदहं न भवामि तथा अस्मिन् अपि संघाते यद्यद् दृश्यं तत्तदहं न भवामि किन्तु योऽत्र ज्ञोऽशः सोऽस्मि सर्वशरीरेषु एकलक्षणलक्षिततत्वाद् एक एव इति विचारेण प्रथमं सम्भावितः इत्यर्थः। (९)

सा हृन्मनीट् कथं प्राप्यत इति तदर्थो योग उच्यते -

**यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।**

**बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम्।। २.३.१० ।।**

यदा पञ्च ज्ञानानि मनसा सह अवतिष्ठन्ते बुद्धिश्च न विचेष्टति तां परमां गतिम् आहुः ।। २.३.१० ।।

**विपरीतभावना-निवृत्तिः एव निदिध्यासनस्य फलम्।भाष्यम्**

यदा यस्मिन्काले स्वविषयेभ्यो निवर्तितानि आत्मन्येव पञ्च ज्ञानानि - ज्ञानार्थत्वात् श्रोत्रादीनीन्द्रियाणि

ज्ञानान्युच्यन्ते - अवतिष्ठन्ते सह मनसा यदनुगतानि तेन सङ्कल्पादि-व्यावृत्तेनान्तःकरणेन।

बुद्धिश्च अध्यवसाय-लक्षणा न विचेष्टति, स्व-व्यापारेषु न विचेष्टते, न व्याप्रियते, तामाहुः परमां गतिम्।।

१० ।।

**आनन्दगिरिटीका**

श्रुतवेदान्तानामपि केषांचित् ब्रह्मास्मीति बुद्धिस्थैर्यादर्शनादस्ति किंचित् प्रतिबन्धकान्तरं तदपनयोपायोऽप्यन्यो वक्तव्य इत्यभिप्रेत्याह - **सा हृदि** इत्यादिना। श्रवणमननाभ्यां प्रमाण-प्रमेयासम्भावना-निरासेऽपि चित्तस्यानेकाग्रतादोषः प्रतिबन्धकः सम्भवति। तदपनयाय योगोऽनुष्ठातव्य उपदिश्यते इत्यर्थः। **यदनुगतानि** इति। येन येन (मनस ऐक्येपि राजसादिभेदेन नानात्वमादाय आह - येन येन इति। यादृशेन इति यावत्।) मनसा अधिष्ठितानि तेन तेन सह अवतिष्ठन्ते। निवृत्तव्यापाराणि भवन्ति इत्यर्थः। (१०)

**तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्।**

**अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ।। २.३.११ ।।**

स्थिरामिन्द्रियधारणां तां योगमिति मन्यन्ते। तदा अप्रमत्तः भवति (भवेत्)। योगो हि प्रभवाप्ययौ।। २.३.११ ।।
**मिथ्यात्वमेव अनात्मनः यथार्थभावः इति, भाष्यम्**

ताम् ईदृशीं तदवस्थां योगमिति मन्यन्ते वियोगमेव सन्तम्।

सर्वानर्थ-संयोग-वियोग-लक्षणा हीयमवस्था योगिनः।

एतस्यां हि अवस्थायाम् अविद्याध्यारोपण-वर्जितः स्वरूप-प्रतिष्ठ आत्मा।

स्थिराम् इन्द्रियधारणां स्थिरामचलामिन्द्रिय-धारणाम्।

बाह्यान्तः-करणानां धारणमित्यर्थः।

अप्रमत्तः प्रमाद-वर्जितः, समाधानं प्रति नित्यं यत्नवान्।

तदा तस्मिन्काले, यदैव प्रवृत्त-योगो भवति इति सामर्थ्यादवगम्यते।

न हि बुद्ध्यादि-चेष्टाभावे प्रमाद-सम्भवोऽस्ति। तस्मात्प्रागेव बुद्ध्यादि-चेष्टोपरमात् अप्रमादो विधीयते।

अथवा, यदैव इन्द्रियाणां स्थिरा धारणा, तदानीमेव निरङ्कुशमप्रमत्तत्वम् इत्यतोऽभिधीयते अप्रमत्तस्तदा

भवतीति।

कुतः योगो हि यस्मात् प्रभवाप्ययौ उपजनापाय-धर्मक इत्यर्थः।

अतः अपाय-परिहारायाप्रमादः कर्त्तव्य इत्यभिप्रायः।। ११ ।।

**आनन्दगिरिटीका**

वियोगमेव सन्तं योगमिति विरुत्धलक्षणया मन्यन्ते इत्युक्तम्। तत्स्फुटयति - सर्वानर्थेति। उपसंहृतं मनो यदि सुषुप्तिं गच्छेत् तदा सा अनर्थबीजावस्था भवति। तद्व्यावृत्तये पूर्णं ब्रह्मास्मीत्यावृत्तौ योजयेत्। आवृत्तौ नियुक्तं विषयेषु विक्षिप्तं चेत् स्यात् तद्दोषदर्शनेन ततोऽपि व्यावर्तयेत्। व्यावृत्तमपि ततः तटस्थं चेत् स्यात् साऽपि यावत् कषायावस्था (रागादिकषायाणामवस्था) ततो निरुद्धं मनो यदा न जागर्ति न स्वपिति न च अन्तरालावस्थं भवति पूर्णब्रह्मावभासकतया एव क्षीणं भवति तदा सर्वानर्थवियोगलक्षणा सा अवस्था भवति इत्यर्थः। योगारम्भकाले प्रमादवर्जनं विधेयतया व्याख्याय अनुवादपरतया व्याचष्टे - **अथवेति**। विधिपक्षे हेतुं पृच्छति - **कुतः** इति। (११)

बुद्ध्यादि-चेष्टा-विषयं चेद् ब्रह्म इदं तदिति विशेषतो गृह्येत, बुद्ध्याद्युपरमे च ग्रहण-

कारणाभावादनुपलभ्यमानं नास्त्येव ब्रह्म।

यद्धि करण-गोचरं तदस्तीति प्रसिद्धं लोके विपरीतं चासदिति।

अतश्चानर्थको योगोऽनुपलभ्यमानत्वाद्वा नास्तीत्युपलब्धव्यं ब्रह्म इत्येवं प्राप्ते, इदमुच्यते -

**नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा।**

**अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते।। २.३.१२ ।।**

वाचा न एव प्राप्तुं शक्यः। मनसा न (एव प्राप्तुं शक्यः) चक्षुषा न (एव प्राप्तुं शक्यः)। अस्तीति ब्रुवतोऽन्यत्र (नास्तीति ब्रुवतः) कथं तदुपलभ्यते।। २.३.१२ ।।

**सहस्रमातृभ्यः अपि हितैषिणीभाष्यम्**

सत्यम्।

नैव वाचा न मनसा न चक्षुषा नान्यैरपीन्द्रियैः प्राप्तुं शक्यते इत्यर्थः।

तथापि सर्व-विशेष-रहितोऽपि जगतो मूलमित्यवगतत्वाद् अस्त्येव, कार्य-प्रविलापनस्य अस्तित्व-

निष्ठत्वात्।

तथा हि इदं कार्यं सूक्ष्म-तारतम्य-पारम्पर्येण अनुगम्यमानं सद्-बुद्धि-निष्ठामेवावगमयति।

यदापि विषय-प्रविलापनेन प्रविलाप्यमाना बुद्धिः, तदापि सा सत्प्रत्यय-गर्भैव विलीयते।

बुद्धिः हि नः प्रमाणं सदसतोर्याथात्म्यावगमे।

मूलं चेज्जगतो न स्याद्, असदन्वितमेवेदं कार्यम् असत् असत् इत्येव गृह्येत, न त्वेतदस्ति।

सत् सत् इत्येव तु गृह्यते। यथा मृदादि-कार्यं घटादि मृदाद्यन्वितम्।

तस्माज्जगतो मूलमात्मा अस्तीत्येवोपलब्धव्यः।

कस्मात् अस्तीति ब्रुवतः अस्तित्व-वादिनः आगमार्थानुसारिणः श्रद्दधानाद् अन्यत्र नास्तिक-वादिनि नास्ति जगतो मूलमात्मा, निरन्वयमेवेदं कार्यमभावान्तं प्रविलीयते इति मन्यमाने विपरीत-दर्शिनि, कथं तद् ब्रह्म तत्त्वतः उपलभ्यते न कथञ्चनोपलभ्यत इत्यर्थः।। १२ ।।

**आनन्दगिरिटीका**

उत्तरमन्त्रमवतारयितुं शङ्कामुद्भावयति - **बुद्ध्यादिचेष्टाविषयं चेत्** इति। घटोऽस्ति इति प्रतिपन्नस्य घटस्य मुद्गराभिघाताद् विलापिते घटाकार एव विलीयते नास्तित्वांशः। तस्य कपालादौ अपि अनुवृत्तिदर्शनात्। अतः कार्यप्रविलापनस्य अस्तित्वनिष्ठत्वाद् न शून्यतापर्यवसायी लयः इत्युक्तमेतत् स्फुटयति - **तथा हि** इति। स्थूलस्य कार्यस्य विलये सूक्ष्मं तत्कारणमवशिष्यते तस्यापि विलये ततः सूक्ष्ममिति यावद्दर्शनं व्याप्तिमुपलभ्य यत्र दृश्यते तत्रापि मूर्त्तविलयस्य अवश्यंभावित्वात् सन्मात्रमेव अमूर्त्तं अवतिष्ठते इति कार्यमेव सौक्ष्मतारतम्यपारम्पर्येण अनुस्रियमाणं सद्बुद्धिनिष्ठां पुरुषस्य गमयति इत्यर्थः। ननु यद्दृश्यं तदसद् यथा स्वप्नदर्शनमिति व्याप्तिदर्शनाद् अस्तित्वेन दृश्यस्य असत्वात् स□ुद्धिरपि नास्त्येव इत्याशङ्क्याह - **यदापि** इति। स□ुद्धिरपि नास्तीत्येवंभूतः प्रत्ययः अवश्यमस्ति इत्यभ्युपगन्तव्यम्। अन्यथा निषेधव्यवहारायोगात्। अतोऽन्ततो गत्वा स□ुद्धिः स्वीकृता स्यादित्यर्थः। ततः किमित्यत आह - **बुद्धिर्हि** इति। व्यभिचारिष्वपि विषयेषु सन्मात्रबुद्धेः अव्यभिचारदर्शनाद् बुद्धेश्च स्वतः प्रामाण्यात् सन्मात्रं वस्तु अभ्युपगन्तव्यमित्यर्थः। इतश्च सदेव मूलं जगतः वाच्यमित्याह - मूलं चेदिति। नास्ति जगतो मूलं ब्रह्म इत्यवगमेऽपि प्रतियोगितया ब्रह्मज्ञानसम्भवात् किमिति मुमुक्षुणा ब्रह्मज्ञानकामेन अस्तीत्येवोपलब्धव्यमित्याह - **कस्मादिति**। प्रतियोगितया ज्ञातस्य निषेध्यत्वाद् आत्मतया ज्ञानं न स्यात्। अतो ब्रह्मज्ञानकामेन अस्ति जगन्मूलमिति अवगन्तव्यमेव इत्याह - **अस्तीति ब्रुवतः** इत्यादिना। (१२)

**अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः।**

**अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति।। २.३.१३ ।।**

अस्तीत्येव उपलब्धव्यः। तत्त्वभावेन च (उपलब्धव्यः)। उभयोः अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति।। २.३.१३ ।।

तस्मादपोह्यासद्वादि-पक्षमासुरम् अस्तीत्येव आत्मा उपलब्धव्यः सत्कार्यः बुद्ध्याद्युपाधिः।

यदा तु तद्रहितोऽविक्रिय आत्मा, कार्यं च कारण-व्यतिरेकेण नास्ति वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् (छा. ६.१.४) इति श्रुतेः, तदा तस्य निरुपाधिकस्यालिङ्गस्य सदसदादि-प्रत्यय-विषयत्व-वर्जितस्यात्मनः तत्त्वभावो भवति।

तेन च रूपेणात्मोपलब्धव्य इत्यनुवर्त्तते।

तत्रापि उभयोः सोपाधिक-निरुपाधिकयोः अस्तित्व-तत्त्वभावयोः - निर्धारणार्था षष्ठी - पूर्वम् अस्तीत्येव उपलब्धस्य आत्मनः सत्कार्योपाधि-कृतास्तित्व-प्रत्ययेन उपलब्धस्येत्यर्थः।

पश्चात् प्रत्यस्तमित-सर्वोपाधि-रूपः आत्मनः तत्त्वभावः विदिताविदिताभ्याम् अन्योऽद्वय-स्वभावः नेति नेति (बृ. ४.४.२२) इति, अस्थूलमनण्वह्रस्वम् (बृ. ३.८.८) अदृश्येऽनात्म्ये निरुक्तेऽनिलयने (तै. २.७) इत्यादि-श्रुति-निर्दिष्टः प्रसीदति अभिमुखीभवति आत्म-प्रकाशनाय।

पूर्वमस्तीत्युपलब्धवतः इत्येतत्।। १३ ।।

**आनन्दगिरिटीका**

सोपाधिकस्य आत्मनः ज्ञनान्मुक्त्यसम्भवाद् निरुपाधिकज्ञानायापि प्रयतितव्यमित्याह - **यदा तु** इति। सोपाधिके प्रथमं स्थिरीभूतस्य तद्द्वारेण लक्ष्यपदार्थावगमे सति क्रमेण वाक्यार्थावगतिः सम्भाव्यते इत्याह - **तत्रापि उभयोः** इत्यादिना। सदुपलभ्यमानं कार्यमुपाधिः यस्य कारणत्वस्य तत्कृतो योऽस्तित्वप्रत्ययः कारणत्वाद् अस्ति पर आत्मा इति तेन उपलब्धस्य इति योजना। (१३)

**यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।**

**अथ मर्त्योऽमृतो भवति। अत्र ब्रह्म समश्नुते।। २.३.१४ ।।**

यदा येऽस्य हृदि श्रिताः सर्वे कामाः प्रमुच्यन्ते अथ मर्त्योऽमृतो भवति। अत्र ब्रह्म समश्नुते।। २.३.१४ ।।

एवं परमार्थात्म-दर्शिनो यदा यस्मिन्काले सर्वे कामाः कामयितव्यस्यान्यस्याभावात् प्रमुच्यन्ते विशीर्यन्ते।

ये अस्य प्राक्प्रतिबोधाद्विदुषो हृदि बुद्धौ श्रिताः आश्रिताः।

बुद्धिः हि कामानामाश्रयः नात्मा, कामः सङ्कल्पः (बृ १.५.३) इत्यादि-श्रुत्यन्तराच्च।

अथ तदा मर्त्यः प्राक्प्रबोधादासीत् स प्रबोधोत्तर-कालम् अविद्या-काम-कर्म-लक्षणस्य मृत्योः विनाशात् अमृतो भवति।

गमन-प्रयोजकस्य मृत्योर्विनाशाद् गमनानुपपत्तेः, अत्र इहैव प्रदीप-निर्वाणवत् सर्व-बन्धनोपशमात् ब्रह्म समश्नुते ब्रह्मैव भवतीत्यर्थः।। १४ ।।

**आनन्दिगरिटीका**

**सर्वे कामा** इति। प्रवृत्तफलकर्मोपस्थापिते शरीरस्थितिनिमित्तान्नपानादौ प्रवृत्तिकारणेच्छाव्यतिरिक्ताः सर्वे कामाः काम्येन ज्योतिष्टोमादिना स्वर्गं प्राप्स्यामि त्रैपुर्याराधनेन जनं वशीकरिष्यामि इत्येवमादयः स्वर्गादिदेहेषु अपि अहमेव तिष्ठामि तद्भोगाश्च प्राप्ता एव अप्राप्तविषयश्च कामो व्यर्थो मिथ्या चासौ इति विचारेण विशीर्यन्ते इत्यर्थः।कामाश्रय आत्मा इति वैशेषिकमतं श्रुतिबाह्यत्वाद् नादरणीयमेव इत्याह - बुद्धिर्हि इति। (१४)

कदा पुनः कामानां मूलतो विनाशः इत्युच्यते -

**यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः।**

**अथ मर्त्योऽमृतो भवति। एतावद्ध्यनुशासनम्।। २.३.१५ ।।**

यदा इह हृदयस्य सर्वे ग्रन्थयः प्रभिद्यन्ते अथ मर्त्योऽमृतो भवति। एतावद्ध्यनुशासनम्।। २.३.१५ ।।

**अविद्याग्रन्थिभेदो मोक्षः**

यदा सर्वे प्रभिद्यन्ते भेदमुपयान्ति विनश्यन्ति हृदयस्य बुद्धेः इह जीवत एव ग्रन्थयः ग्रन्थिवद् दृढ-बन्धन-रूपा अविद्या-प्रत्यया इत्यर्थः।

अहमिदं शरीरं, ममेदं धनं, सुखी दुःखी चाहम् इत्येवमादि-लक्षणाः तद्विपरीत-ब्रह्मात्म-प्रत्ययोपजननाद् ब्रह्मैवाहमस्म्यसंसारी इति विनष्टेष्वविद्या-ग्रन्थिषु तन्निमित्ताः कामा मूलतो विनश्यन्ति।

अथ मर्त्योऽमृतो भवति।

एतावद्धि एतावदेवैतावन्मात्रं, न अधिकमस्ति इत्याशङ्का कर्त्तव्या।

अनुशासनम् अनुशिष्टिः उपदेशः सर्व-वेदान्तानाम् इति वाक्य-शेषः।। १५ ।।

**आनन्दगिरिटीका**

कामप्रविलयस्य सुषुप्तेऽपि भावाद् अमृतत्वचिह्नत्वं न भवति इति मत्वा आह - कदा पुनः इति। (१५)

निरस्ताशेष-विशेष-व्यापि-ब्रह्मात्म-प्रतिपत्त्या प्रभिन्न-समस्ताविद्यादि-ग्रन्थेः जीवत एव ब्रह्म-भूतस्य विदुषो न गतिर्विद्यते, अत्र ब्रह्म समश्नुते इत्युक्तत्वात्।

न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति (बृ. ४.४.६) इति श्रुत्यन्तराच्च।

ये पुनर्मन्द-ब्रह्म-विदो विद्यान्तर-शीलिनश्च ब्रह्म-लोक-भाजः, ये च तद्विपरीताः संसार-भाजः, तेषामेष गति-विशेष उच्यते प्रकृतोत्कृष्ट-ब्रह्म-विद्या-फल-स्तुतये।

किञ्चान्यत्, अग्नि-विद्या पृष्टा प्रत्युक्ता च।

तस्याश्च फल-प्राप्ति-प्रकारो वक्तव्य इति मन्त्रारम्भः।

तत्र -

**शतं चैका च हृदयस्य नाड्यः। तासां मूर्धानमभिनिःसृतैका।**

**तयोर्ध्वमायन्नमृतत्वमेति। विष्वङ्ङ्न्या उत्क्रमणे भवन्ति।। २.३.१६ ।।**

हृदयस्य शतं चैका च नाड्यः। तासां एका मूर्धानमभिनिःसृता। तया ऊर्ध्वमायन्नमृतत्वमेति। अन्याः विष्वङ् उत्क्रमणे भवन्ति।। २.३.१६ ।।

**कर्मोपासनासमुच्चयफलम् (सगुणब्रह्मविद्याफलम्)**

शतं च शत-सङ्ख्याकाः एका च सुषुम्ना नाम पुरुषस्य हृदयाद्विनिःसृताः नाड्यः शिराः।

तासां मध्ये मूर्धानं भित्त्वा अभिनिःसृता निर्गता सुषुम्ना नाम। तया अन्त-काले हृदये आत्मानं वशीकृत्य योजयेत्। तया नाड्या ऊर्ध्वम् उपरि आयन् गच्छन् आदित्य-द्वारेण अमृतत्वम् अमरण-धर्मत्वमापेक्षिकम् - आभूत-सम्प्लवं स्थानम् अमृतत्वं हि भाष्यते (वि.पु. २.८.९७) इति स्मृतेः, ब्रह्मणा वा सह कालान्तरेण मुख्यममृतत्वम् - एति भुक्त्वा भोगाननुपमान् ब्रह्म-लोक-गतान्।

विष्वङ् नाना-विध-गतयः अन्याः नाड्यः उत्क्रमणे निमित्तं भवन्ति।

संसार-प्रतिपत्त्यर्था एव भवन्तीत्यर्थः।। १६ ।।

**आनन्दगिरिटीका**

प्रकरणविच्छेदेन उत्तरस्य संबन्धं दर्शयति - **निरस्ताशेषेत्यादिना**। यदभाणि भास्करेण प्रकरणाद् ब्रह्मविद्विषयैवेयं (परस्पराकांक्षा प्रकरणं तद्बलात्) गतिरिति तदसत्। गतिश्रवणेन लिङ्गेन (अर्थप्रकाशनसामर्थ्यं लिङ्गं तेन) परिच्छिन्ने गमनयोग्ये अस्याः गतेः संबन्धावगमे सति दुर्बलेन प्रकरणेन (श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् इति न्यायात् इति भावः) प्रकृत-ब्रह्मवित्सम्बन्धानुपपत्तेः। नाड्यन्तराणामपि (विष्वङ्ङन्या उत्क्रमणे भवन्ति इति वाक्यस्यापि तन्मते प्रकरणाद् ब्रह्मविद्विषयस्याविशेषात्) तत्संबन्धप्रसङ्गात् श्रुतिविरुद्धत्वप्रसङ्गाच्च (न तस्य प्राणाः, ब्रह्मसंस्थोऽमृतत्वमेति इत्यादिश्रुतीत्यर्थः)। (१६)

इदानीं सर्ववल्ल्यर्थोपसंहारार्थमाह -

**अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः।**

**तं स्वाच्छरीरात् प्रवृहेन्मुञ्जादिवेषीकां धैर्येण।**

**तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति।। २.३.१७ ।।**

अङ्गुष्ठमात्रः पुरुषः अन्तरात्मा सदा जनानां हृदये सन्निविष्टः। मुञ्जाद् इषीकाम् इव तं (आत्मानम्) स्वाच्छरीरात् धैर्येण प्रवृहेत्। तं शुक्रममृतं विद्यात् तं शुक्रममृतं विद्यात् इति।। २.३.१७ ।।

**उपनिषदर्थोपसंहारः**

अङ्गुष्ठमात्रः पुरुषः अन्तरात्मा सदा जनानां सम्बन्धिनि हृदये सन्निविष्टः यथा-व्याख्यातः।

तं स्वात् आत्मीयात् शरीरात् प्रवृहेत् उद्यच्छेद् निष्कर्षेत् पृथक् कुर्यादित्यर्थः।

किम् इव इत्युच्यते - मुञ्जाद् इव इषीकाम् अन्तःस्थां धैर्येण अप्रमादेन।

तं शरीरान्निष्कृष्टं चिन्मात्रं विद्याद् विजानीयात् शुक्रं (शुद्धम्) अमृतं यथोक्तं ब्रह्मेति।

द्विर्वचनमुपनिषत्परिसमाप्त्यर्थम्, इति-शब्दश्च।। १७ ।।

विद्या-स्तुत्यर्थोऽयमाख्यायिकार्थोपसंहारः अधुनोच्यते -

**मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम्।**

**ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं यो विदध्यात्ममेव।। २.३.१८ ।।**

नचिकेतः अथ एतां मृत्युप्रोक्तां विद्यां कृत्स्नं योगविधिं च लब्ध्वा ब्रह्मप्राप्तो विरजः विमृत्युः अभूत्। यः अन्यः अपि एवंविद् अध्यात्ममेव।। २.३.१८ ।।

।। इति कठोपनिषत्समाप्ता।।

**आख्यायिकार्थोपसंहारः**

मृत्युप्रोक्ताम् यथोक्ताम् एतां ब्रह्म-विद्यां योगविधिं च कृत्स्नं समस्तं सोपकरणं सफलमित्येतत्।

नाचिकेतः वरप्रदानान्मृत्योः लब्ध्वा प्राप्येत्यर्थः।

किम् ब्रह्मप्राप्तः अभूत् मुक्तोऽभवदित्यर्थः।

कथम् विद्या-प्राप्त्या विरजः विगत-धर्माधर्मः विमृत्युः विगत-कामाविद्यश्च सन् पूर्वमित्यर्थः।

न केवलं नाचिकेत एव, अन्योऽपि नाचिकेतवद् आत्म-विद् अध्यात्ममेव निरुपचरितं प्रत्यक्-स्वरूपं प्राप्य तत्त्वमेव इत्यभिप्रायः।

नान्यद्रूपमप्रत्यग्रूपम्।

तदेवमध्यात्मम् एवम् उक्त-प्रकारेण यः वेद विजानातीति एवंवित्, सोऽपि विरजः सन् ब्रह्म प्राप्य विमृत्युर्भवतीति वाक्य-शेषः।। १८ ।।

**आनन्दगिरिटीका**

आत्मानं देहमधिकृत्य वर्तते इत्यध्यात्मम्। प्रत्यक्स्वरूपमेव ब्रह्म प्राप्य विमृत्युः भवति, नान्यद्रूपमर्चिरादिमार्गगम्यं प्राप्य, संयोगस्य वियोगावसानत्वादित्यर्थः। एवंशब्दस्य विच्छेदेन सह संबन्धः एवंविद् इति। (१७-१९)

शिष्याचार्ययोः प्रमाद-कृतान्यायेन विद्या-ग्रहण-प्रतिपादन-निमित्त-दोष-प्रशमनार्थेयं शान्तिरुच्यते -

**सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।**

**तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥**

**ॐ शान्तिः शान्तिः शान्तिः ॥**

सह नौ आवाम् अवतु पालयतु विद्या-स्वरूप-प्रकाशनेन।

कः सः एव परमेश्वरः उपनिषत्प्रकाशितः।

किञ्च सह नौ भुनक्तु तत्फल-प्रकाशनेन नौ पालयतु।

सह एव आवां विद्या-कृतं वीर्यं सामर्थ्यं करवावहै निष्पादयावहै।

किञ्च तेजस्विनौ तेजस्विनोः आवयोः यद् अधीतं तत् स्वधीतम् अस्तु।

अथवा तेजस्वि नौ आवाभ्यां यदधीतं तदतीव तेजस्वि वीर्यवदस्तु इत्यर्थः।

मा विद्विषावहै शिष्याचार्यौ अन्योन्यं प्रमाद-कृतान्यायाध्ययनाध्यापन-दोषनिमित्तं द्वेषं मा करवावहै इत्यर्थः।

शान्तिः  शान्तिः शान्तिः इति त्रिर्वचनं सर्वदोषोपशमनार्थमिति।

ओमिति।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य

श्रीमच्छंकरभगवतः कृतौ कठोपनिषद्भाष्यम् सम्पूर्णम्।।